तामैरयꣳ श्चन्द्रमसि स्वधाभि-
स्तां धीरासः [19]कवयोऽनुदृश्यायजन्त ॥१०॥

प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽरातिरायुः प्राणं मा निर्मार्जीश्चक्षुः श्रोत्रं मा निर्मार्जीर्वाचं पशून् मा निर्मार्जीर्यज्ञं प्रजां मा निर्मार्जीस्तेजोऽसि शुक्रमसि ज्योतिरस्यमृतमसि वैश्वदेवमसि ॥

हविरसि [20]वैश्वानरमुन्नीतशुष्मꣳ सत्यौजाः ।
सहोऽसि सहस्वारातिꣳ सहस्व पृतनायतः ॥

सहस्रवीर्यमसि [21]तन्मा जिन्वाज्यस्याज्यमसि हविषो हविः सत्यस्य [22]सत्याभिघृतꣳ सत्येन त्वाऽभि घारयाम्यदब्धेन त्वा चक्षुषाऽवेक्षे स्पोषाय सुप्रजास्त्वाय ॥

---

१६. S, V1, V2, V3, V4 -ताम्, [B1 - ते ]; Cp S - MS IV.1.10 ता [ओषधीन
१७. V, V1, V2, V3, V4 - परावती ।
१८. V, V1, V2, V3, V4 - विरप्सिन ।
१९. Sc - ॰नुदिश्या॰ ।
२०. S, V, V1, V2 - ॰शुष्मꣳ ।
२१. S, V - तन्वा; V1 - तन्वा; B1 - तत् । मा; V3, V4 - तन्वा ।
२२. S, V1 - सत्याभिहितं ।

धामासि प्रियं देवानामनाधृष्टं देवयजनम् ।

देववीत्यै त्वा गृह्णामि ।।

देवीराप: शुद्धा यूयं देवान् युयुध्वं शुद्धा वयं सुपरिविष्टा: परिवेष्टारो वो भूयास्म [२३]कृष्णोऽस्याखरेष्ठो अग्नये घृतं भव वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि बर्हिरसि वेद्यै त्वा जुष्टं प्रोक्षामि स्वाहा पितृभ्यो घर्मपावभ्य: ।।११।।

पूषा ते ग्रन्थिं विष्यतु विष्णो स्तुपोऽस्युरु [२४]प्रथस्वोर्णम्रदं स्वासस्थं देवेभ्यो गन्धर्वोऽसि विश्वावसुर्विश्वस्मादीषमाणो यजमानस्य परिधिरिड ईडितं इन्द्रस्य बाहुरसि दक्षिणो यजमानस्य परिधिरिड ईडितो मित्रावरुणौ त्वोत्तरत: परि धत्तां यजमानस्य परिधिरसीड ईडित: ।।

नित्यहोतारं त्वा कवे द्युमन्त: समिधीमहि ।।

वर्षिष्ठे अधि नाके पृथिव्या: सूर्यस्त्वा रश्मिभि: पुरस्तात् पातु कस्याश्चिदभिशस्त्या विश्वजनस्य विधृती स्थो वसूनां रुद्राणामादित्यानां सदोऽसि स्रुचां [२५]योनिर्द्यौरसि जन्मना जुहूर्नाम प्रिया देवानां प्रियेण नाम्ना ध्रुवे सदसि सीदान्तरिक्षमसि जन्मनोपभृन्नाम प्रिया देवानां प्रियेण नाम्ना ध्रुवे सदसि सीद पृथिव्यसि जन्मना ध्रुवा नाम प्रिया देवानां प्रियेण नाम्ना ध्रुवे सदसि सीद ऋषभोऽसि शाक्वरो वषट्कारस्य त्वा मात्रायां सादयामि ।। ध्रुवा [२६]असदन्नृतस्य योनौ सुकृतस्य लोके ता विष्णो पाहि ।। पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्युम् ।। विष्णूनि स्थ वैष्णवानि धामानि स्थ प्राजापत्यानि ।।१२।।

[२७]सूर्यमे मेऽद्य स्तं स्वावृतौ सूपावृता अग्नाविष्णू वि जिहाथां मा मा हिंसिष्टं लोकं मे लोककृतौ कृणुतं मा मोदोषिष्टमात्मानं मे पातं शिवौ भवतमद्य नो विष्णो स्थामासीत इन्द्रस्तिष्ठन् वीर्यमकृणोद्देवताभि: [२८]समारभ्य ।।

---

२३. V - °स्याषरेष्ठो ।

२४. S, V1 - स्वोर्णम्रदं ; [V3, V4, B1 -प्रथस्व। ऊर्णम्रदमित्यूर्ण-म्रदं।]।

२५. V - यौनिर्द्यौरसि; V1, V2 - यौनिर्द्यौरसि ।

२६. S, V, V1, V2 - असदन्नृतस्य ।

२७. [Sc - foot note - सुर्यमे इति सु-यमे; B1 - सुर्यम(?) इति सु-यमे । But MŚS I.3.1.11 - सूयमे - All other mss - सूर्यमे]

२८. S, V, V1, V2 - समारभ्य: ।

ऊर्ध्वो अध्वरो दिविस्पृग्गह्रुतो यज्ञो यज्ञपते: ।
इन्द्रवान्त्स्ववान् [२९]बृहद्भा: ।।
[३०]वीहि मधोर्घृतस्य स्वाहा सं ज्योतिषा ज्योति: ।।
वाजस्य मा प्रसवेनोद्ग्राभेणोदजिग्रभत् ।
अथा सपत्नानिन्द्रो मे निग्राभेणाधराँ अक: ।।
उद्ग्राभश्च निग्राभश्च ब्रह्म देवाँ अवीवृधत् ।
अथा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् ।।
वसुरस्युपावसुरसि विश्वावसुरस्यप्तुभी रिहाणा व्यन्तु वयो वशा पृश्निर्भूत्वा मरुतो गछ ततो नो [३१]वृष्ट्याऽवत ।।
सꣳ स्रावभागा स्थेषा बृहन्त: प्रस्तरेष्ठा बर्हिषदश्च देवा: ।
इमाꣳ वाचमभि विश्वे गृणन्त: स्वाहा देवा अमृता मादयन्ताम् ।।
देवा गातुविदो गातुꣳ वित्त्वा गातुमित मनसस्पते सुधात्विमꣳ यज्ञं दिवि देवेषु वाते धा: स्वाहा ।।१३।।

।। इति प्रथमकाण्डे प्रथमस्थान: प्रथम: प्रपाठक: ।।

---

२९. S, V, V1, V2 - बृहद्भा:; [B1 - बृहद्भा इति बृहत्-भा:]; [Cp TS 1.1.12 - बृहत् -भा: ]।

३०. V1, V2, - वीहि ।

३१. Sc - foot note - वृष्ट्यावत ।

# GOPATHA BRĀHMAṆA

Edited by
Hukam Chand Patyal

## INTRODUCTION

The Gopatha-Brāhmaṇa (GB.) is the only brāhmaṇa text of AV. belonging to both the recensions, viz. Śaunaka and Paippalāda. The GB. text, as it has come down to us, does not bear any accent marks. No commentary is available on this text. The text is divided into two parts, the pūrva-bhāga or brāhmaṇa in five prapāṭhakas, and the uttara-bhāga or brāhmaṇa in six prapāṭhakas. The prapāṭhaka is further divided into the kaṇḍikās. The pūrva shows more originality especially in the glorification of the Atharvan and its priests. Its subject-matter is different from that of the common Brāhmaṇa type. The uttara is comparatively less original. In the case of some legends the text gives Atharvanic colouring by introducing Atharvanic personages (see e.g. GB. 2. 1. 2 dealing with the prāśitra-legend, here the seers Idhma Āṅgirasa and Barhi Āṅgirasa are introduced; also see GB. 2.1.17; 2.2.6; 2.3.9 etc.)

**The editions of the text**

The GB. text was first edited by Rājendralāla Mitra. and Haracandra Vidyābhūṣaṇa (abbr. to M.) in the Bibliotheca Indica, New Series Nos. 215 and 252 (work no. 69), Calcutta (1872). This edition is full of printing errors, and the editors have not taken any pains in emending the text even when it could have been possible for them.

The GB. was also edited by Jīvānanda Vidyāsāgara from Calcutta in 1891. I could not have access to this text. This edition and M.'s edition are utilised by Kṣemakaraṇadāsa Trivedī. This edition is practically the same as that of M.

Dutch scholar Dieuke Gaastra (abbr. to G.) brought out a critical edition of the text from Leiden in 1919. This edition pro-

vides a very exhaustive introduction in German. This edition is based on six Mss. (mentioned in her introduction, pp. 2-8). Despite the editor's utmost care some printing errors have crept in the text. She has also provided parallel text places, has noticed rare vocables not found in PW., pw. In the appendix the list of mantras, verses and sacrificial formulas is given in the Devanāgarī alphabetical order.

Paṇḍita Kṣemakaraṇadāsa Trivedī in 1924 brought out Hindi translation with Sanskrit Vyākhyā of this text from Allahabad. Second edition of this book appeared in 1977 from Allahabad. The editors of this second edition Prajñā Devī and Medhā Devī claim this edition to be a revised one, but in my opinion this does not contain revision of real value. The text is solely based on the editions of M. and Vidyāsāgara. This translation is based on sectarian and uncritical outlook. Hence this is not of much critical value.

Recently Vijayapāla Vidyāvāridhi (abbr. to V.) has brought out edition of this text. This is published by Ramlal Kapur Trust from Bahalgarh (Haryana) in 1980. V. has based his text on G.'s edition (to our great surprise he thinks Gaastra to be a male). He has made use of two Mss. from Pune(these are Diw. 1 and 2 in our list). He does provide parallel passages in his notes, but at times his comparisons are misleading. Even these two Mss. he has not collated meticulously. Let us point out such lacunae.

V. in fn. 3 on GB. 1.1.13 records the reading *prasākṣīd iti* from M., really speaking this reading is found in all Mss., the reading *pradhākṣīd iti* is suggested by Böhtlingk which is adopted by G. and also by V. (see note 55 on this reading in my text). In fn. 3 on 1.1.15 V. suggests *bhavati* (?) for *bhāti*, but here there is no need for emendation. V. at 2.3.20 accepts the reading *punarādāya* (whereas at 2.5.3 rightly *punarādāyam*), we have to accept *-am* form (cf. KB. 15.2; 15.4; AB. 3.17(12.6), he cites AB. 3.23 (?). Diw. 1 also reads *punarādāyam*. V. in GB. 2.6.14 adopts G's reading *śucam* and in his fn.11 records *sracam* from Mss., whereas Diw. 1 and 2 read *srucam*. I have left some printing errors. He has very tentatively utilised these two Mss.

The present writer has translated this text : Gopatha Brāhmaṇa--English Translation with Notes and Introduction, un-

published Ph. D. thesis, Poona University (1969). This translation is based on G's edition, but other editions as well as some Mss. are also used for this purpose.

Otto von Böhtlingk "Probe einer Kritik des Gopatha Brāhmaṇa" provides useful annotations on this text (G. records some of them under *Bemerkungen* in her *Einleitung*, pp. 27-36).

Maurice Bloomfield's *The Atharvaveda and the Gopatha Brāhmaṇa* in *Grundriss* series is a very important contribution on the subject. This provides a very good account of the Atharvaveda literature in general. Contents of GB. are provided in detail in this monograph. An attempt is also made to show mutual relationship with Vait. and Kauś. of GB.

**Manuscripts used for this fascicule**

The following Mss. are used in preparing this small *fascicule* of GB.

These Mss. were procured from Vaidika Saṁśodhana Maṇḍala, Pune (for their description, see *Descriptive Catalogue of Manuscripts* edited by T. N. Dharmadhikari, Vol. I (Veda and Vedic), (1974)).

**Diw.1.** S. No. 804, Acc. No. 8575, size 22.5 x 10 cms.; 168 folios, 8 lines, 35 letters in each line. Śaka 1642. This belongs to Diwekar Collection. This has Miri Markings. Paper, Devanāgarī script. The last folio is faded. A blank square with a hole is kept in the middle of each folio.

**Diw.2.** S. No. 803, Acc. No. 8576, size 20 x 10.5 cms., 201 folios, 7 lines, 35 letters in each lines. Śaka 1773-74. Paper, Devanāgarī script. Miri markings only in the Pūrva Brāhmaṇa. Scribe is Bāḷambhaṭṭa.

**Go.** Pūrva Bhāga alone. S. No. 805, Acc No. 4135, size 20.5 x 8.2 cms., 92 folios, 7 lines, 20 letters in each line. For each prapāṭhaka folio numbers are separately given. First two folios are missing, the third one srarts from °पत्समतपत् ताभ्य: (1.1.3). This Ms. is only up to a part of 1.5.24 (गीत्या स्तोमेन सह प्रस्तावेन च); this does not have the remaining part of 1.5.24 and 1.5.25. This Ms. belongs to Gore Collection.

There are two more Mss. of GB. in Gore Collection, see S. No. 806, Acc No. 4137 (14 foll.), and S. No. 807, Acc. No. 4136

(5 foll.), beginning of fifth prapāṭhaka of the uttarabhāga. I have not made use of both these fragmentary Mss.

**Ad.** *Descriptive Catalogue of Sanskrit Manuscripts in the Adyar Library* (Madras), Vol. I, p. 162. Acc No. 64310. 529 41B. 75, Paper, Devanāgarī script, 67 folia (marked 1-70, foll. 1, 2 and 29 are missing, size 8.1" x 4.5", 8 lines in a page. Good and large size writing. This Ms. is from a part of 1.1.4 to the end of 1.3. To our great surprise the Ms. is full of mistakes, and there are also many omissions and commissions of all sorts (see e.g. foll. 10 A, 28A). It appears to be comparatively new.

**Ān.** Ānandāśrama, Pune, Nos.4306 (folios 1-21) and 3661 (folios 22-119). Though the handwritten catalogue assigns two numbers, yet in reality this appears to be one manuscript, and it completes the text. At the beginning of the Ms. it is written : गोपथब्राह्मणं सादाशिवे: . This appears to be fairly old. It provides some good readings. Paper, Devanāgarī script. Folios 1-21 contain 15 lines on each page with small letters, whereas in later portion the number of lines varies from 11 to 14 on each page. Scribes for foll. 1-21 and 22-119 are two different persons, that is what appears obvious from handwriting.

**Bh.** This Ms. belongs to Bharat Itihas Mandal, Pune - 30 (see हस्तलिखितग्रन्थानुक्रमणिका, edited by G. H. Khare, (1970), p. 87 A). This Ms. belongs to S. N. Joshi Collection, Wai, Satara. Paper, Devanāgarī script. It contains only the uttarabhāga of the text. Excellent condition, 81 folios, 8 lines on each page. It has Miri markings. The scribe is one Nāgara Brāhmaṇa from Visala-nagara (modern Bisnagar in Gujrat).

**W.** *Descriptive Catalogue of Sanskrit Manuscripts* [Prājña Pāṭhaśālā Maṇḍala Collection], Pt. I, pp. 86-7, edited by Laxmanshastri Joshi, (1970), Prājña Pāṭhaśālā Maṇḍala, Wai. S. No. 670, L. No. 1-4 / 93. Paper, Devanāgarī script. Size 31.4 x 14.4 cms., folios 61, lines 12, letters per line 58. Good condition. Date is not mentioned.

In addition to these above mentioned Mss. I shall also be utilising some of the important Mss. of GB. mentioned in *Descriptive Catalogue of the Government Collection of Manuscripts* (deposited at Deccan College, Pune, but now in the possession of Bhandarkar Oriental Research Institute, Pune), Vol. I, Pt. 1,

pp. 298-305, Bombay (1916), S. Nos. 409-420.

Shri Radhe Shyam Shastri also procured a xerox copy of GB. Ms. from Alwar (Rajasthan), but for this *fascicule* I could not make use of it.

For a detailed list of Gopatha Brāhmaṇa Mss., see *New Catalogus Catalogorum* VI. 128, Madras University, (1971).

**Some better readings available in these Mss.**

In the course of my study of these Mss. I have noticed some better readings in some of these Mss. For example, *svayaṁbhvekam eva* GB. 1.1.1 (Ān.); *udakrāmat* GB. 2.2.6 (Ān.,Bh) (G. erroneously *udakramat*, M. rightly has this reading); *nakṣatriyām* GB. 2.1.19 (Bh.) (G. adopts *nakṣatrīyām*, cf. KB. 5.1); majority of Mss. read *abhyaghārāt* GB. 2.5.5, but G. emends the reading to *abhyāgāram*, we have *abhyāgārāt* (in Bh).

It is true that some of the readings still will remain unintelligible despite our best efforts.

For the purpose of this *fascicule* I have taken GB. 1.1.1-15. This portion deals with an Atharvanic cosmogony in Upaniṣad manner (cf. BṛĀra U. 5.4). In the typical Brahmanical style the etymologies of the words like *sveda, aṅgirasa, bhṛgu, mṛtyu* etc. are provided through the *parokṣavṛtti*. Five *vyāhṛtis*, viz. *vṛdhat, karat, ruhat* (M. and also Bloomfield read *guhat*), *mahat,* and *tad* are associated with the *sarpaveda, piśācaveda, asuraveda, itihāsaveda*, and the *purāṇaveda* respectively. The scrifice is said to be 'threefold', seven-stringed consisting of 21 forms. The entire cosmogony establishes the Atharvan as the pivot around wich all creative acts revolve. Brahman-priest is the priest *par excellence* (for details of the contents of each kaṇḍikā, see Bloomfield, AV. and GB. sec, 67).

I hope that I have pointed out with sufficient clarity that there is need for a revised edition of the Gopatha Brāhmaṇa text.

**Colophon**

My thanks are due to Shri. Radhe Shyam Shastri. It was he who assigned the task of editing this text to me. He was kind enough in procuring xerox-copies of many Mss. of the text from different parts of the country. Dr. C. G. Kashikar, my guru, de-

serves heartfelt thanks with whom I has many fruitful discussions on technical aspects of editing. Dr. T. N. Dharmadhikari was kind enough in lending out to me three manuscripts mentioned above for my use.

# अथ गोपथब्राह्मणम्

## पूर्वभागः

### प्रथमः प्रपाठकः

ओं नमोऽथर्ववेदाय नमः ॥

ओं ब्रह्म ह वा इदमग्र आसीत् स्वयंभ्वेकमेव[1] । तदैक्षत[2] महद्वै यक्षं यदेकमेवास्मि[3]। हन्ताहं मदेव मन्मात्रं द्वितीयं देवं निर्मिमा[4] इति। तदभ्यश्राम्यदभ्यतपत् समतपत् । तस्य श्रान्तस्य तप्तस्य संतप्तस्य ललाटे स्नेहो यदार्द्रमाजायत[5] । तेनानन्दत् तदब्रवीन्महद्वै यक्षं सुवेदमविदमहमिति[6] । तद्यदब्रवीन्महद्वै यक्षं सुवेदमविदमहमिति[6] तस्मात् सुवेदोऽभवत् । तं वा एतं सुवेदं सन्तं स्वेद इत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः[7] ॥१॥

स भूयोऽश्राम्यद् भूयोऽतप्यद् भूय आत्मानं समतपत् । तस्य श्रान्तस्य तप्तस्य संतप्तस्य सर्वेभ्यो रोमगर्तेभ्यः पृथक् स्वेदधाराः प्रास्यन्दन्त[8] । ताभिरनन्दत् । तदब्रवीदाभिर्वा अहमिदं सर्वं धारयिष्यामि यदिदं किं चाभिर्वा अहमिदं सर्वं जनयिष्यामि यदिदं किं चाभिर्वा अहमिदं सर्वमाप्स्यामि यदिदं किं चेति । तद्यदब्रीदाभिर्वा अहमिदं सर्वं धारयिष्यामि यदिदं किं चेति । तस्माद्धारा अभवन् । तद् धाराणां धारात्वं यच्चासु ध्रियते[9] । तद्यदब्रवीदाभिर्वा अहमिदं

---

1. G. rightly suggests this reading which is found in Ān, whereas other Mss. and M. have स्वयंत्वेकमेव.
2. Ān . तदीक्षत.
3. This reading is after G., all Mss. have तदे°.
4. This is after G., all Mss. read निर्मम.
5. This is suggested by Bŏhtlingk. Diw. 1 and 2 यदार्द्रियमा°, W.यदाद्रियमा°, Ān. यदर्द्रिमा°.
6. This is suggested by Böhtilingk. Diw. 1 and 2 °महा इति, Ān., W. °मह इति, and also repeated elsewhere.
7. Cf. this cosmogonic myth with that of Bṛ Āra U. 5.4.
8. W. प्राक्स्यंदंत.
9. W. ध्रियते.

सर्वं जनयिष्यामि यदिदं किं चेति तस्माज्जाया अभवन् । तज्जायानां जायात्वं यच्चासु[10] पुरुषो जायते यच्च पुत्रः । पुन्नाम नरकमनेकशततारं तस्मात् त्रातीति[11] पुत्रः । तत् पुत्रस्य पुत्रत्वम् । तद्यदब्रवीदाभिर्वा अहमिदं सर्वमाप्स्यामि यदिदं किं चेति तस्मादापोऽभवन्। तदपामप्त्वम्[12]। आप्नोति वै स सर्वान् कामान् यान् कामयते[13] ।।२।।

ता अप:[14] सृष्ट्वान्वैक्षत । तासु स्वां छायामपश्यत् । तामस्येक्षमाणस्य स्वयं रेतोऽस्कन्दत् । तदप्सु प्रत्यतिष्ठत् । तास्तत्रैवाभ्यश्राम्यदभ्यतपत् समतपत् । ताः श्रान्तास्तप्ताः संतप्ताः सार्धमेव रेतसा द्वैधमभवन् । तासामन्यतरा[15] अतिलवणा अपेया अस्वाद्वयस्ता अशान्ता रेतः समुद्रं वृत्वातिष्ठन्[16] । अथेतराः पेयाः स्वाद्व्यः शान्तास्तास्तत्रैवाभ्यश्राम्यदभ्यतपत् समतपत् । ताभ्यः श्रान्ताभ्यस्तप्ताभ्य:[17] संतप्ताभ्यो यद्रेत आसीत् तदभृज्ज्यत[18] । यदभृज्ज्यत[18] तस्माद्भृगुः समभवत् । तद् भृगोर्भृगुत्वम् । भृगुरिव वै स सर्वेषु लोकेषु भाति य एवं वेद ।।३।।

स भृगुं सृष्ट्वान्तरधीयत । स भृगुः सृष्टः प्राङैजत[19] । तं वागन्ववदद्वायो वाय इति[20] । स न्यवर्तत स दक्षिणां दिशमैजत[21] । तं वागन्ववदन्मातरिश्वन् मातरिश्वन्निति । स न्यवर्तत । स प्रतीचीं दिशमैजत[21] । तं वागन्ववदत् पवमान पवमानेति । स न्यवर्तत । स उदीचीं दिशमैजत[21] । तं वागन्ववदद्वात वातेति । तमब्रवीन्न न्वविदमहमिति[22] । न हीति । अथार्वाङेनमेतास्वेवाप्स्वन्विच्छेति । तद् यदब्रवीदथार्वाङेनमेतास्वेवाप्स्वन्विच्छेति तदथर्वाभवत् । तदथर्वणो-

10. G. has printing error या °.
11. The form *trāti* class II. P. is irregular for regular class IV Ā.
12. Diw.1 °पामत्वम्, W. °पामपत्वम्.
13. G. expects य एवं वेद at the end after the style of subsequent kaṇḍikās, but there is no Ms. evidence. V. supplies this portion in square brackets in the text itself.
14. Diw.2, Ān. आपः.
15. All Mss. °मन्या अन्यतरा.
16. V. and Diw.1 वृत्त्वा°which is not desirable.
17. Diw.1 and 2, Go., W., Ān. श्रान्ताभ्यःस्तप्ताभ्यः, this is an orthographic peculiarity, also repeated elsewhere.
18. All Mss. °भृज्यत.
19. All Mss. प्राङेजत°. This is G.' s suggestion.
20. All Mss. वायो वायो इति.
21. All Mss. दिशमेजत.
22. Diw.1 and 2, W. °विदामहा इति, Ān. °विदामह इति.

ऽथर्वत्वम् । तस्य ह वा एतस्य भगवतोऽथर्वण ऋषेर्यथैव ब्रह्मणो लोमानि यथाङ्गानि यथा प्राण एवमेवास्य सर्व[23] आत्मा समभवत् । तमथर्वाणं ब्रह्माब्रवीत् प्रजापतेः प्रजाः सृष्ट्वा पालयस्वेति तस्मात् प्रजापतिरभवत् । तत् प्रजापतेः प्रजापतित्वम् । अथर्वा वै प्रजापतिः । प्रजापतिरिव वै स सर्वेषु लोकेषु भाति य एवं वेद ।।४।।

तमथर्वाणमृषिमभ्यश्राम्य[24]दभ्यतपत् समतपत् । तस्माच्छ्रान्तात् तप्तात् संतप्ताद् दशतयानथर्वण ऋषीन् निरमिमीतैकर्चान्[25] द्व्यृचांस्तृचांश्चतुर्ऋचान् पञ्चर्चान्त्षडर्चान्त्सप्तर्चानष्टर्चान् नवर्चान् दशर्चानिति । तानथर्वण ऋषीनभ्यश्राम्यदभ्यतपत् समतपत् । तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यो दशतयानाथर्वणानार्षेयान् निरमिमीतैकादशान्[25] द्वादशांस्त्रयोदशांश्चतुर्दशान् पञ्चदशान् षोडशान्त्सप्तदशान् अष्टादशान् नवदशान् विंशानिति । तानथर्वण[26] ऋषीनाथर्वणांश्चार्षेयानभ्यश्राम्यदभ्यतपत् समतपत् । तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यो यान् मन्त्रानपश्यत् स आथर्वणो वेदोऽभवत् । तमाथर्वणं वेदमभ्यश्राम्यदभ्यतपत् समतपत् । तस्माच्छ्रान्तात् तप्तात् संतप्तादोमेति मन एवोर्ध्वमक्षरमुदक्रामत् । स य इच्छेत् सर्वैरेतैरथर्वभिश्चाथर्वणैश्च कुर्वीयेत्येतयैव तन्महाव्याहृत्या[27] कुर्वीत । सर्वैर्ह[28] वा अस्यैतैरथर्वभिश्चाथर्वणैश्च कृतं भवति य एवं वेद यश्चैवंविद्वानेवमेतया महाव्याहृत्या कुरुते ।।५।।

स भूयोऽश्राम्यद् भूयोऽतप्यद् भूय आत्मानं समतपत् । स आत्मत एव त्रीँल्लोकान् निरमिमीत पृथिवीमन्तरिक्षं दिवमिति । स खलु पादाभ्यामेव पृथिवीं निरमिमीतोदरादन्तरिक्षं मूर्ध्नो दिवम् । स तांस्त्रीँल्लोकानभ्यश्राम्यदभ्यतपत् समतपत् । तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यस्त्रीन् देवान् निरमिमीताग्निं वायुमादित्यमिति । स खलु पृथिव्या एवाग्निं निरमिमीतान्तरिक्षाद् वायुं दिव आदित्यम् । स

---

23. V. सर्वं, which is perhaps a p printing error.
24. Go. °भ्यः श्राम्यद्, Diw. 1 and 2 °मभ्यश्रांम्यद् here and elsewhere.
25. All Mss. निरमिमत. This reading is after Böhtlingk's suggestion. G. accepts निरमिमीत in the subsequent kaṇḍikās but here twice she reads निरमिमत, which appears to be a printing error.
26. Ān. °थवण.
27. Mss. तं महा° here and elsewhere
28. Diw.2 सर्वैह.

तांस्त्रीन् देवानभ्यश्राम्यदभ्यतपत् समतपत् । तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यस्त्रीन् वेदान् निरमिमीत ऋग्वेदं यजुर्वेदं सामवेदमिति । अग्नेर्ऋग्वेदं वायोर्यजुर्वेदमादित्यात् सामवेदम् । स तांस्त्रीन् वेदानभ्यश्राम्यदभ्यतपत् समतपत् । तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यस्तिस्रो महाव्याहृतीर्निरमिमीत भूर्भुवः स्वरिति । भूरित्यृग्वेदाद् भुव इति यजुर्वेदात् स्वरिति सामवेदात् । स य इच्छेत् सर्वैरेतैस्त्रिभिः वेदैः कुर्वीयेत्येताभिरेव तन्महाव्याहृतिभिः कुर्वीत । सर्वैर्ह वा अस्यैतैस्त्रिभिर्वेदैः कृतं भवति य एवं वेद यश्चैवंविद्वानेवमेताभिर्महाव्याहृतिभिः कुरुते ॥६॥

ता या अमू रेतः वृत्वातिष्ठंस्ताः प्राच्यो दक्षिणाच्यः[29] प्रतीच्य[30] उदीच्यः समवद्रवन्त[31] । तद्यत् समवद्रवन्त[31] तस्मात् समुद्र उच्यते । ता भीता अब्रुवन् भगवन्तमेव वयं राजानं वृणीमह इति । यच्च वृत्वातिष्ठंस्तद्वरणोऽभवत् । तं वा एतं वरणं[32] सन्तं वरुण इत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः। स समुद्रादमुच्यत[33] । स मुच्युरभवत् । तं वा एतं मुच्युं सन्तं मृत्युरित्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः । तं वरुणं मृत्युमभ्यश्राम्यदभ्यतपत् समतपत् । तस्य श्रान्तस्य तप्तस्य संतप्तस्य सर्वेभ्योऽङ्गेभ्यो रसोऽक्षरत्[34] । सोऽङ्गरसोऽभवत् । तं वा एतमङ्गरसं सन्तमङ्गिरा[35] इत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः ॥७॥

तमङ्गिरसमृषिमभ्यश्राम्यदभ्यतपत् समतपत् । तस्माच्छ्रान्तात् तप्तात् संतप्ताद्विंशिनोऽङ्गिरस ऋषीन् निरमिमीत । तान् विंशिनो[36]ऽङ्गिरस ऋषीनभ्यश्राम्यदभ्यतपत् समतपत् । तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः[37] संतप्तेभ्यो[38] दशतयानाङ्गिरसानार्षेयान् निरमिमीत

29. Ān. दक्षिणाच्य.
30. Diw. 2 प्रतिच्य
31. Augmentless impf.
32. W. वरुणं.
33. Diw. 1 and 2, Ān., Ad. °मुच्युता; Go.°मुच्यता.
34. Diw. 2 °क्षर.
35. W. अङ्गिरा.
36. See Mahā Bh. on P. 5.2.37 which gives this as an example of secondary suffix—ḍin.
37. Diw. 1 तत्पेभ्यः, an orthographic error (similarly तत्पात्, संतत्पात्).
38. Diw. 1 संतत्पेभ्यः, an orthographic error.

षोडशिनोऽष्टादशिनो द्वादशिन एकर्चान् द्व्यृचांस्तृचांश्चतुर्ऋचान्[39] पञ्चर्चान् षडर्चान् सप्तर्चानिति । तानङ्गिरस ऋषीनाङ्गिरसांश्चार्षेयानभ्यश्राम्यदभ्यतपत् समतपत् । तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यो यान् मन्त्रानपश्यत् स आङ्गिरसो वेदोऽभवत् । तमाङ्गिरसं वेदमभ्यश्राम्यदभ्यतपत् समतपत् । तस्माच्छ्रान्तात् तप्तात् संतप्ताज्जनदिति द्वैतमक्षरं व्यभवत् । स य इच्छेत् सर्वैरेतैरङ्गिरोभिश्चाङ्गिरसैश्च कुर्वीयेत्येतयैव तन्महाव्याहृत्या कुर्वीत । सर्वैर्ह वा अस्यैतैरङ्गिरोभिश्चाङ्गिरसैश्च कृतं भवति य एवं वेद यश्चैवंविद्वानेवमेतया महाव्याहृत्या कुरुते ॥८॥

स ऊर्ध्वोऽतिष्ठत् । स इमाँल्लोकान् व्यष्टभ्नात् तस्मादङ्गिरसो[40]ऽधीयान ऊर्ध्वस्तिष्ठति । तद् व्रतम् । स मनसा ध्यायेद् यद्वा अहं किं च मनसा ध्यास्यामि तथैव तद् भविष्यति । तद्ध स्म तथैव भवति । तदप्येतदृचोक्तम् —

श्रेष्ठो ह[41] वेदस्तपसोऽधि जातो
ब्रह्मज्यानां[42] क्षितये[42] संबभूव ।
ऋच्यृग्भूतं[43] यदसृज्यतेदं
निवेशनमनृणं दूरमस्येति ॥

ता वा एता अङ्गिरसां जामयो[44] यन्मेनयः । करोति मेनिभिर्वीर्यं य एवं वेद ॥९॥

स दिशोऽन्वैक्षत प्राचीं दक्षिणां प्रतीचीमुदीचीं ध्रुवामूर्ध्वामिति । तास्तत्रैवाभ्यश्राम्यदभ्यतपत् समतपत् । ताभ्यः श्रान्ताभ्यस्तप्ताभ्यः संतप्ताभ्यः पञ्च वेदान् निरमिमीत सर्पवेदं पिशाचवेदमसुरवेदमि-

---

39. Diw. 2 चतुऋ°.
40. W. °ङिरसो°.
41. हि in Sāyaṇa's introduction (p.6) to Vishva Bandhu's ed. of AVŚ.
42. Sāyaṇa reads ब्रह्मज्ञानां हृदये, this reading is adopted by V. I prefer the reading of Mss. and render the text accordingly. 'This is the most excellent Veda born of fervour and(it) came into being in order to destroy the oppressors of (the knowers of) Brahman'. Cf. TB. 3.7.9.2 where the expression अपहतं ब्रह्मज्यस्य occurs. Bhaṭṭa Bhāskara: ब्राह्मणानां मंत्राणां वा जेतुः रक्षःपतेरपि अपहतं अपहतिरस्तु. See Mahā Bh. on Vār. 1 on P. 3.2.3, where the form ब्रह्मज्य is cited as an example of the suffix-ḍa.
43. M. and Ān. ऋज्यद्भूतं; W. ऋज्यग्भूतं; Ad. ऋग्यद्भूतम्.
44. M. यामयो.

तिहासवेदं पुराणवेदमिति । स खलु प्राच्या एव दिशः सर्पवेदं निरमिमीत दक्षिणस्याः पिशाचवेदं प्रतीच्या असुरवेदमुदीच्या इतिहासवेदं ध्रुवायाश्चोर्ध्वायाश्च पुराणवेदम् । स तान् पञ्च वेदानभ्यश्राम्यदभ्यतपत् समतपत् । तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः[45] संतप्तेभ्यः पञ्च महाव्याहृतीर्निरमिमीत वृधत्करद्रुहन्म[46]हत्तदिति । वृधदिति सर्पवेदात् करदिति पिशाचवेदाद् रुहदित्यसुरवेदान्महदितीतिहासवेदात् तदिति पुराणवेदात् । स य इच्छेत् सर्वैरेतैः पञ्चभिर्वेदैः कुर्वीयेत्येताभिरेव तन्महाव्याहृतिभिः कुर्वीत । सर्वैर्ह[47] वा अस्यैतैः पञ्चभिर्वेदैः कृतं भवति य एवं वेद यश्चैवंविद्वानेवमेताभिर्महाव्याहृतिभिः कुरुते ॥१०॥

स आवतश्च परावतश्चान्वैक्षत । तास्तत्रैवाभ्यश्राम्यदभ्यतपत् समतपत् । ताभ्यः श्रान्ताभ्यस्तप्ताभ्यः संतप्ताभ्यः शमित्यूर्ध्वमक्षरमुदक्रामत् । स य इच्छेत् सर्वाभिरेताभिरावद्भिश्च परावद्भिश्च कुर्वीयेत्येतयैव तन्महाव्याहृत्या कुर्वीत । सर्वाभिर्ह अस्यैता[48]भिरावद्भिश्च परावद्भिश्च कृतं[49] भवति य एवं वेद यश्चैवंविद्वानेवमेतया महाव्याहृत्या कुरुते ॥११॥

स भूयोऽश्राम्यद् भूयोऽतप्यद् भूय आत्मानं समतपत् । स मनस एव चन्द्रमसं निरमिमीत नखेभ्यो नक्षत्राणि लोमभ्य ओषधिवनस्पतीन् क्षुद्रेभ्यः प्राणेभ्यो[50]ऽन्यान् बहून् देवान् । स भूयोऽश्राम्यद् भूयोऽतप्यद् भूय आत्मानं समतपत् । स एतं त्रिवृतं सप्ततन्तुमेकविंशतिसंस्थं यज्ञमपश्यत् । तदप्येतदृचोक्तम् — अग्निर्यज्ञं त्रिवृतं सप्ततन्तुमिति[51] । अथाप्येष प्राक्रीडितः[52] श्लोकः[52] प्रत्यभिवदति — सप्त सुत्याः सप्त च पाकयज्ञा इति[53] ॥१२॥

---

45. Ān. श्रोतेभ्यस्तप्तेभ्यः.
46. M. गुहन् for रुहन्. Bloomfield, Ved. Con. 899b, records गुहन्, but in Kauś. 91.12 rightly has रुहत् Ad. has ब्रह्मन् for रुहन्, but later on rightly रुहदित्य°.
47. Ān सर्वेर्ह. 48. Ān. अस्ये°.
49. Ad. क्रतं. 50. Ān. प्रोणेभ्यो.
51. AV. (P.) 5. 28. 1.
52. Ān. प्राक्रीडीत श्लोकः; Ad. प्राक्रीडितश्लोकः; Diw. 1 प्राक्रीडितं श्लोकः. Böhtlingk suggests प्राक्रोडितः.
53. Cf. GB. 1.5.25 which further reads हविर्यज्ञाः सप्त तथैकविंशतिः. Diw. 2 पावक इति for पाकयज्ञा इति.

तमाहरत् । तेनायजत । तस्याग्निर्होतासीद् वायुरध्वर्युः सूर्य उद्गाता चन्द्रमा ब्रह्मा पर्जन्यः सदस्य ओषधिवनस्पतयश्चमसाध्वर्यवो विश्वे देवा होत्रका अथर्वाङ्गिरसो गोप्तारः । तं ह स्मैतमेवंविद्वांसः[54] पूर्वे श्रोत्रिया यज्ञं ततं सावसाय ह स्माहेत्यभिव्रजन्ति मा नोऽयं घर्म उद्यतः प्रमृत्तानाममृताः प्रजाः प्रधाक्षीदिति[55] । तान् वा एतान् परिरक्षकान्त्सदःप्रसर्पकानित्याचक्षते दक्षिणासमृद्धान् । तदु ह स्माह प्रजापतिः । यद्वै यज्ञेऽकुशला ऋत्विजो भवन्त्यचरितिनो[56] ब्रह्मचर्यमपराग्या[57] वा तद्वै यज्ञस्य विरिष्टमित्याचक्षते । यज्ञस्य विरिष्टमनु यजमानो विरिष्यते । यजमानस्य विरिष्टमन्वृत्विजो विरिष्यन्ते । ऋत्विजां विरिष्टमनु दक्षिणा विरिष्यन्ते । दक्षिणानां विरिष्टमनु यजमानः पुत्रपशुभिर्विरिष्यते । पुत्रपशूनां विरिष्टमनु यजमानः स्वर्गेण लोकेन विरिष्यते । स्वर्गस्य लोकस्य विरिष्टमनु तस्यार्धस्य योगक्षेमो विरिष्यते यस्मिन्नर्धे यजन्त इति ब्राह्मणम् ॥१३॥

तं ह स्मैतमेवंविद्वांसं ब्रह्माणं यज्ञविरिष्टी वा यज्ञविरिष्टिनो वेत्युपधावेरन् । नमस्ते अस्तु भगवन्[58] । यज्ञस्य नो विरिष्टं संधेहीति[59] । तद् यत्रैव विरिष्टं स्यात् तत्राग्नीनुपसमाधाय शान्त्युदकं कृत्वा पृथिव्यै श्रोत्रायेति[60] त्रिरेवाग्नीन्त्संप्रोक्षति त्रिः पर्युक्षति त्रिः कारयमाणमा[61]चामयति च संप्रोक्षति च यज्ञवास्तु च संप्रोक्षति । अथापि वेदानां रसेन यज्ञस्य विरिष्टं संधीयते । तद्यथा लवणेन सुवर्णं

54. G. and V. read separetely एवं विद्वांसः, which is not desirable.

55. All Mss. and M. read प्रसाक्षीदिति. G. follows Böhtlingk's suggestion प्रधाक्षीदिति. *prādhākṣīt* is s-aor. 3 / 1 of *pra- dah* —; see J. Narten, Die sigmatischen Aoriste im Veda, p. 134; K. Hoffmann, Der Injunktiv im Veda, p. 61. Ch U. 4.1. 2 has *pradhākṣīḥ* 'one expects here too *prādhākṣīt*, also see JB. 1.39.

56. Diw. 2 °चरतिनो.

57. Ad.ब्रह्मचर्यमृपराग्या°· Böhtlingk conjectures ब्रह्मचर्येऽपराध्या°.

58. VS. 16.52b; MS. 2.9.9; KS. 17.16b; TS. 4.5.10.5 (all these texts read *bhagavaḥ* ). See Ved. Con. 533a.

59. Its source is not known.

60. Extraction of AVŚ. 6.10.1.

61. G. has a printing error कारयमानम्.

संदध्यात् सुवर्णेन रजतं रजतेन लोहं लोहेन सीसं सीसेन त्रप्वे[62]वमेवास्य यज्ञस्य विरिष्टं संधीयते । यज्ञस्य संधितिमनु यजमानः संधीयते । यजमानस्य संधितिमन्वृत्विजः संधीयन्ते[63] । ऋत्विजां संधितिमनु दक्षिणाः संधीयन्ते । दक्षिणानां संधितिमनु यजमानः पुत्रपशुभिः संधीयते । पुत्रपशूनां संधितिमनु यजमानः स्वर्गेण लोकेन संधीयते । स्वर्गस्य लोकस्य संधितिमनु तस्यार्धस्य योगक्षेमः संधीयते यस्मिन्नर्धे यजन्त इति ब्राह्मणम् ।।१४।।

तदु ह स्माहाथर्वा देवो विजानन्[64] यज्ञविरिष्टानन्दानीत्युपशमयेरन् । यज्ञे प्रायश्चित्तिः क्रियतेऽपि च यदु बह्विव[65] यज्ञे विलोमं[66] क्रियते न चैवास्य काचनार्तिर्भवति न च यज्ञविष्कन्धमुपयात्यपहन्ति पुनर्मृत्युमपात्येति पुनराजातिं कामचारोऽस्य सर्वेषु लोकेषु भाति[67] य एवं वेद यश्चैवंविद्वान् ब्रह्मा भवति यस्य चैवंविद्वान् ब्रह्मा दक्षिणतः सदोऽध्यास्ते यस्य चैवंविद्वान् ब्रह्मा दक्षिणत उदङ्मुख आसीनो यज्ञ आज्याहुतीर्जुहोतीति ब्राह्मणम् ।।१५।।

62. Cf. Ch U. 4.17.7; JUB. 3.17. 3.
63. W. संधीयते.
64. Source of this formula is not known.
65. W. बह्वीव.
66. M., Diw. 1 and 2, Go., Ān., Ad. read विलोमः; W. विलोम.
67. V. suggests भवति(?). This is unncessary.

# ऐतरेयारण्यकम्

## [ सायणभाष्यसंवलितम् ]

संपादकः
मुनीश्वरदेवः

### भूमिका

तदानीमुपलभ्यमानानां हस्तलेखानां स्वल्पानेव कांश्चिदुपयुज्य संस्कृत्य राजेन्द्रलालमित्रेण १८७६ ख्रिस्ताब्दे कलिकातात ऐतरेयारण्यकं सायणभाष्येण सहितं प्रकाशितम् । ततः कांश्चिदन्यान् हस्तलेखानवलम्ब्य राजेन्द्रलालमित्र-संस्करणम् अदृष्ट्वैव पुण्यपत्तनस्थेनानन्दाश्रमेण स्वपण्डितैः संपाद्य १८९८ ख्रिस्ताब्दे प्रकाशितम् । ते उभे संस्करणे समवलोक्य तयोः पाठैरसंतुष्टेन कीथेन पूर्वप्रयुक्तहस्तलेखेभ्योऽन्यान् हस्तलेखान् संगृह्य संमेल्य समालोच्य च मूलमैतरेयारण्यकम् आङ्ग्लभाषया अनुवादेनाऽङ्ग्लभाषानिबद्धया भूमिकया, बहुभिः परिशिष्टैश्चालंकृत्य १९०९ ख्रिस्ताब्दे लन्दनतः प्रकाशितम् । नूनं तत्संस्करणं पूर्वसंस्करणाभ्यां शोभनतरं विद्यते ।

कीथसंस्करणात् पूर्वयोर्द्वयोरपि संस्करणयोर्विषये कीथवद् अन्येषामपि पाठकानाम् इयं धारणा संभाव्यते यत् तयोः कतरदपि शुद्धं संस्करणं नास्तीति।

राजेन्द्रलालमित्रेण संगृहीतहस्तलेखैः सह स्वीयां स्वतंत्रेच्छामपि संमिश्र्य तत्र रोचकान् शोभनान् पाठान् मनसा प्रकल्प्य स्वसंस्करणं प्रकाशितम् (द्र. कीथभूमिका पृ. ९) । तत्र पाठेषु कतरो हस्तलेखपाठः कतरश्च मनःप्रकल्पित इति ज्ञातुं न शक्यते यावत् ते हस्तलेखा न दृश्येरन् । आनन्दाश्रमसंस्करणं त्रुटितान् पाठान् तत्र तत्र भाव्यान् अन्यांश्च पाठान् प्रकल्प्य तान् कोष्ठबद्धान् करोति । प्रकल्पनाभावे तान् प्रश्नचिह्नाङ्कितान् करोति । राजेन्द्रलाल-संस्करणेन न तथा क्रियते ।

आनन्दाश्रमसंस्करणम् अपेक्षितान् सर्वान् पाठभेदान् न परिगृह्णाति । भूतेऽपि बहुत्र महत्योऽशुद्धयः सन्ति। तासु काश्चिन्निदर्शिता अपि कीथेन (द्र. तस्य भूमिका पृ. ९), तथापि स सर्वं विविच्याऽऽनन्दाश्रमसंस्करणं राजेन्द्र-

लालसंस्करणाच्छोभनतरं मन्यते ।

अस्यां स्थितौ पूर्वोक्तसंस्करणगुणयुक्तस्य तद्दोषरहितस्य च संस्करणस्य नितान्तमपरिहार्याऽपेक्षा विद्यते । सायणभाष्य उद्धृतानां पूर्वमनिर्दिष्टग्रन्थस्थलानां २०० वाक्यानां ग्रन्थस्थलानि निर्देष्टव्यानि सन्ति भाविसंस्करणे । अड्यार-पुस्तकालयादुपलब्धस्यैकस्यातिरिक्तहस्तलेखस्यापि साहाय्यं ग्रहीष्यते । षड्गुरु-शिष्यस्य, द्वितीयतृतीयारण्यकयोः शंकरमध्वाचार्ययोश्च पाठभेदाः, आधुनिक-रीत्या विरामादिचिह्नानि च विवक्षितार्थस्पष्टप्रतिपत्त्यर्थं प्रदर्शयिष्यन्ते।

पूर्वोक्तसंस्करणानां पाठेषु परस्परं भेदानां निदर्शनानि तालिकया प्रदर्श्यन्ते –

| (मूले) पृष्ठम् | पङ्क्तिः | (१८९८ खिस्ताब्दे प्रकाशिते) आनन्दाश्रमसंस्करणे पाठः | कीथपाठः |
|---|---|---|---|
| १० | १७ | °कयानत्रिंश° | °कया न त्रिंश° |
| १६ | २३ | °न्द्रो गच्छति | °न्द्रो यज्ञं गच्छति |
| १४ | ६ | °काहः शान्त्या | °काहःशान्त्या |
| १९ | ११ | °काहः शान्त्या | °काहःशान्त्या |
| २७ | ११ | °काहः शान्त्या | °काहःशान्त्या |
| ७९ | ८ | °काहः शान्त्या | °काहःशान्त्या |
| ५९ | १३ | स्तोमौ | स्तोमो |
| ७८ | ५-६ | रथस्त्रिचक्र इति पदे तत्त्रिवत्तदन्तो वै त्रिवदन्त एतदहरेतस्याह्नो रूपम् | रथस्त्रिचक्र इति यदेतत्त्रिवत्तदन्तो वै त्रिवदन्त एतदहरेतस्याह्नो रूपम् |
| ८७ | ८ | °न्र्यवन्या | °न्र्यन्या |
| १०८ | २२ | विष्टब्धानीत्येवं | °त्येव (शङ्करश्च) |
| ११४ | १० | ते परा° | ते ह परा° (अन्यत्रापि सर्वत्र) |
| १२२ | १० | उपनिषससाद | उपनिषसाद |
| १२९ | १२ | °नुविधा | °नुविधां |
| १४० | ८ | प्राणे न | प्राणेन |
| १४२ | २० | नवम्रक्ति | नवम्रक्तिः |
| १४३ | २१ | वृथा वाक् | वृथावाक् |
| १४३ | २२ | ओमिति | ओ३मिति |
| १५१ | २० | शृघेऽधि (शङ्करषड्गुरुशिष्यौ) | श्रुतेऽधि (सायणश्च) |
| १५२ | ३ | शृघेऽधि (शङ्करषड्गुरुशिष्यौ) | श्रुतेऽधि (सायणश्च) |

| | | | |
|---|---|---|---|
| १६९ | २५ | °व्यैख्यत् | °व्यैक्षत् |
| १६९ | २६ | ब्रह्मततमम् | ब्रह्म ततमम् |
| १७३ | १५,२० | °धिमाव° | °धि भाव° |
| १८० | १२ | °चोद्भिजानि | °चोद्भिज्जानि |
| १८९ | १३ | अनूद्गृह्णन् | अनुद्गृह्णन् |
| १९० | ३ | तस्मिन् हस्मिन्नाकाशे | तस्मिन् हास्मिन्नाकाशे |
| १९३ | २२ | ब्रुवन् वाऽब्रुवन्तं वा | ब्रुवन् वा ब्रुवन्तं वा |
| १९५ | २१ | ब्रुवन् वाऽब्रुवन्तं वा | ब्रुवन् वा ब्रुवन्तं वा |
| १९५ | ३ | प्राणवंशम् | प्राणं वंशम् |
| १९५ | ४ | समधा३म् | समधाँ३ |
| १९९ | ४,२१,२६ | तार्क्ष्यः | तारुक्ष्यः |
| २०७ | १० | षष्टि शतानि | षष्टिशतानि |
| २०८ | १३ | षष्टि शतानि | षष्टिशतानि |
| २२४ | ११ | विरुरुचुषेत | विरुरुचिषेत |
| २२४ | १९ | न कुलीदन्तैः | नकुलीदन्तैः |
| २२७ | २, १३ | °षकारावुपाप्ता° | °षकारा उपाप्ता° |
| २३४ | ९ | ही३न्द्रम् | ही३न्द्रा |
| २३९ | २४ | माध्यन्दिनः | माध्यन्दिने |
| २४१ | २७ | उदाभिषिक्ताः | उताभिषिक्ताः |
| २४१ | २८ | माऽनु | मा नु |
| २४४ | २४ | प्रभूर्भूयासम् | प्रभुर्भूयासम् |
| २४६ | २२ | °र्वेदि | °र्वेदीति |
| २५२ | २४ | °मन्वीङ्ख° | °मनुवीङ्ख° |
| २५३ | २१ | नानापाणिभ्याम् | नाना पाणिभ्याम् |
| २५४ | २० | °कर्मिणे | °कर्मणे |
| २६१ | १० | °सोमिति | °सो३मिति |
| २६५ | १६ | पुरुवारं | पुरु वारं |
| २६५ | १७ | विजुरो | विजरो |
| २७० | १२ | देवतास्वर्का | देवताः स्वर्का |
| २८३ | २२ | वरुणवव्वितमं | वरुणवाव्वितमं |
| २८३ | २३ | ह्यायतनमासीनो | ह्यायतन आसीनो |
| २९३ | १५ | पुराणे नाऽऽपीते | पुराणेनापीते |
| २९३ | १९ | रात्रौ च न च कीर्तयिषेत् | रात्रौ चन चिकीर्तयिषेत् |

१८९८ खिस्ताब्दे प्रकाशित आनन्दाश्रमसंस्करणे स्थितानाम् अशुद्धपाठानां स्थाने भाविसंस्करणाय शोधिताः पाठाः –

| पृष्ठम् | पङ्क्तिः | मुद्रितः पाठः | शोधितः पाठः |
|---|---|---|---|
| २ | १४ | आत्मसंग्रहात् | अतिसंग्रहात् (तु. रा.) |
| ६ | ४ | [सिद्धमर्थं कथयति] | सिद्धान्तं निगमयति(तु. रा.) |
| ७ | १७ | भागद्वयार्थता | भानाद् द्वयार्थता |
| ८ | २४ | वाच्येन | (व्यर्थपाठः) |
| ११ | २८ | उत | °दुत |
| ११ | २९ | अन्यः | अन्यत् |
| ११ | ३१ | पूर्ववन्न्यायेन न | पूर्ववन्न्यायेन तद् दधि न |
| १४ | १३ | दासीवृत्तबटुमैथुन° | दासीनृत्यबहुभूतमैथुन° (तु. रा.) |
| १५ | २३ | वेति | चेति |
| १६ | २३ | °न्द्रो गच्छति | °न्द्रो यज्ञं गच्छति |
| २० | १८ | उक्थपदं | उक्थ्यपदं |
| २० | २१ | नूनं वेदस्वरूपं | नूनं मन्त्रं वेदस्वरूपं |
| २१ | ११ | सुविद्यते | विद्यते |
| २१ | १८ | मिह | मिहे |
| २१ | २५ | युक्तमेत° | युक्तमेव त° |
| २२ | ९ | ब्रह्माऽऽर्चतेति | ब्रह्माऽर्चतेति |
| २३ | ११ | प्रगाथनेन | प्रग्रथनेन |
| ३१ | ११ | तत्तेनोद्धरंणेना° | तत्तेनोद्भरणेना° |
| ३३ | १४ | °षा स्वर्गप्रापिका | °षा स्वर्गयाणी स्वर्गप्रापिका |
| ३४ | २६ | प्रेङ्खं | प्लेङ्खं (तु. तैसं.) |
| ३६ | ८ | देवरेत [:] सं प्रजायते | देवरेतसं प्रजायते (तु. षड्गुरुशिष्यकीथौ) |
| ३६ | २३ | °शस्त्रप्रशंसनार्थं | °शस्त्रशंसनार्थं |
| ३६ | २४ | पक्षिणामित्येतस्य | हिमित्येतस्य (तु. रा.) |
| ३७ | ९ | तदुक्तमुखे | तदुक्थमुखे |
| ४१ | २५ | °छरीरे | °छरीरेषु |
| ४१ | ४४ | [मूले त्यक्तम्] | सर्वं ह्येतस्माद् बीभाय |
| ५३ | १८ | पकारादिः | यकारादिः |
| ५९ | १३ | स्तोमौ | स्तोमो (तु. षड्गुरुशिष्यकीथौ) |
| ६६ | ४ | पुरुषशरीरः(?) | पुरुषशरीरे |

| | | | |
|---|---|---|---|
| ६८ | २६ | वशाख्या | वशोऽश्व्य |
| ७२ | २६ | संपन्नानां | बृहतीसंपन्नां |
| ८२ | ५ | आत्मनैवा° | आत्मन्येवा° |
| ८२ | २० | चेन्मानसं तु तत् | चेन्न स तत्त्ववित् |
| ८९ | २५ | °नर्त्विक् | नर्त्विजः |
| ८९ | २८ | °शेषकर्तव्यानु° | °शेषकर्मानु° |
| ११० | २९ | °यती ँ३ | °यन्ती ँ३ |
| ११४ | १० | ते पराबभूवुः | ते ह पराबभूवुः |
| ११५ | १७ | कारणाद्वयं | कारणाद्ध्ययं |
| १२२ | १० | उपनिषससाद | उपनिषसाद |
| १२९ | १२,१६ | °नुविधा | °नुविधां |
| १४० | ८ | प्राणे न | प्राणेन |
| १५२ | २१ | चोद्यते | रक्ष्यते |
| १५७ | १५ | °त्यस्य सर्वा | °त्यस्य लोकस्य सर्वा° |
| १५७ | १७ | ६ | ९ |
| १६१ | २८ | ईक्षतेमे लोका | ईक्षतेमे नु लोका |
| १६९ | ७ | जागरितं...समादिशेत् | जाग्रतं...विनिर्दिशेत् |
| १६९ | ९ | स्त्र्यन्न° | स्त्रियन्न° |
| | १० | स्वप्नेषु...विश्वलोके | स्वप्ने स...जीवलोके |
| १८० | १२ | चोद्भिजानि | चोद्भिज्जानि |
| २१७ | २१ | अथापि पिधाया° | अथाप्यपिधाया° |
| २३७ | १२ | °भ्यासाय | °भ्यासङ्ग्यः |
| २३८ | १९ | °पश्वाधानमिति | पशुबन्धानामिति (द्र. आपश्रौ) |
| २४२ | १७ | पृश्निर्ये वैष यशो मरुतो हुताः (?) | पृश्नियै वै पयसो मरुतो जाताः (तैसं २.२.११.४) |
| २४२ | २० | पृश्नये | पृश्नियै (तैसं २.२.११.४) |
| २४९ | २१ | प्राणमात्रः | बाणमात्रः |
| २५४ | २० | °कर्मिणो | (सायणः)कर्मिणे, (कीथः)कर्मणे |
| २५८ | ५ | वदन्त्युत्कोचं.... प्रश्नयो | वदन्त्युत्क्रोद.... पत्नयो (तु. आपश्रौ) |
| २५८ | ६ | वीणाशङ्खानाधीं तूणवाः | वीणावादाः शङ्खान् नाळीस्तूण वानिति (आपश्रौ १९.२१.४) |
| २५८ | १४-१६ | संघातेना°..शयनार्थं | संघाते वा .. व्यधनार्थं... |

| | | | |
|---|---|---|---|
| | | ...च्छ्वसन्ति...तच्च कर्म..प्रवात्सीर्मा निर्वा-त्सी°.. विधानाति पादयन्ति | च्छ्वयन्ति...(आपश्रौ२१.१८.५) तच्चर्म...ऽपरात्सीर्मा..तिवात्सी° ....विद्धानाति पातयन्ति (आपश्रौ २१.१९.१३-१५) |
| २५८ | १७-१८ | °ग्नीध्रीयं ... परि-निहत्या° | °ग्नीध्रं ... परिणिहत्या° (आपश्रौ २१.१८.२-३) |
| २६४ | ७ | °दघर्षन्नैव | °दघर्ष नैव |
| २६४ | ८ | सत्तु (?) म° | शत्रुम° |
| २८३ | २१ | °भर्तृमन्न° | °भर्तृकमन्न° |
| २९४ | ३ | पौर्णमास्यां च चोपा° | प्रौष्ठपद्यां वाऽप्युपा°(मनु ४.९५) |

| आनन्दाश्रमसंस्करणे पाठः | | | राजेन्द्रलालमित्रसंस्करणे पाठः |
|---|---|---|---|
| पृष्ठम् | पङ्क्तिः | | |
| २ | १४ | °ऽऽत्मसंग्रहात् | °तिसंग्रहात् |
| | १७ | अरण्य एव पठ्यं (पाठ्यं) स्यादारण्यकमितीर्यताम् | अरण्य एव पाठ्यत्वा-दारण्यकमितीर्यते |
| ३ | २४ | त्विच्छया | स्वेच्छया |
| ५ | १८ | अत्र सिद्धान्तत्वेन तस्य सूक्तस्य प्रसङ्गं च विधत्ते – | अत्र सिद्धान्तत्वेनैत-त्सूक्तविधानार्थं प्रतिप्रसवं विधत्ते |
| ,, | २४ | अत्रास्तिवाची | सत्तावाची |
| ७ | ५ | तन्त्रेण | तत् तेन |
| ,, | २६ | डिण्डिमः | विदितम् |
| ११ | २७ | चिन्तितः | प्रपञ्चितः |
| १२ | १३ | सर्वे पक्षाः | सप्त पक्षाः |
| १३ | २६ | माक्षिकवाची | मादकवाची |
| १४ | २३ | °दिकं प्रापयन्तम् । मन्त्ररूपां वा वाचं संपादयन्तम् | दिकं, प्रापयन्तीं मन्त्र-रूपां वाचं संपाद-यन्तीम् |
| २२ | २३ | गतः | शत्रुः |
| २३ | ६-८ | अहनि..गतानि... उक्थानि । ...स्तोत्राणि | अहानि.. गतानि ।.... उक्थानि स्तोत्राणि । |

| | | | |
|---|---|---|---|
| | | ..पृष्ठानि । स्तोत्राणि | पृष्ठानि ...स्तोत्राणि । |
| २८ | २२ | एकैकस्यामङ्गुलौ चत्वारि पर्वाणि | एकस्यामङ्गुलौ चत्वारि पर्वाणि |
| २९ | २८ | पवते संचरति | चलन्त्या दोलायाः |
| ३० | २३-२४ | द्वावेव पृथिवी द्यौश्चेतीमौ लोकौ | द्वे एव पृथिवी द्यौश्चे-ति, इमौ लोकौ |
| ३१ | ६ | फलकयोर्लम्बमानतां | फलकयोरन्नसाधनतां |
| ३१ | ९ | वीतयनाम° | वीवघनाम° |
| ३१ | १३ | प्रेङ्खबन्धनाय | प्रेङ्खधारणाय |
| ३३ | २९ | तद्दर्शनार्थं | तद्भर्त्सनार्थं |
| ३४ | २५ | अतः श्रीरासन्दी | अतः अन्नमेव प्रेङ्खः श्रीरासन्दी |

# ऐतरेयारण्यकम्

## [सायणभाष्यसंवलितम्]

**अथ शान्तिः**

**भूमिमुपस्पृशेद् अग्न इळा नम इळा नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो नमो वो अस्तु देवेभ्यः ।**

**शिवा नः शंतमा भव सुमृळीका सरस्वति । मा ते व्योम संदृशि ॥**
**भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।**
**स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥**
**शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।**
**शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥**
**स्तुषे जनं सुव्रतं नव्यसीभिर्गीर्भिर्मित्रावरुणा सुम्नयन्ता ।**
**त आ गमन्तु त इह श्रुवन्तु सुक्षत्त्रासो वरुणो मित्रो अग्निः ॥**
**कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता॥**
**कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृव्हा चिदारुजे वसु ॥**
**अभी षु णः सखीनामविता जरितृणाम् । शतं भवास्यूतिभिः ॥**
**स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथः[१] ॥**
**ओष्ठापिधाना नकुली दन्तैः परिवृता पविः ।**
**सर्वस्यै वाच ईशाना चारु मामिह वादयेत् ॥ इति वाग्रसः ॥**
**ओं शान्तिः शान्तिः शान्तिः ॥ इति शान्तिः ॥**

---

१. इत ऊर्ध्वं क्वचिदधिकः पाठः, स यथा—'उदितः शुक्रियं दधे । तमहमात्मनि दधे । अनु मामैत्विन्द्रियम् । मयि श्रीर्मयि यशः । सर्वः सप्राणः सबलः । उत्तिष्ठाम्यनु मा श्रीः । उत्तिष्ठत्वनु माऽऽयन्तु देवताः । अदब्धं चक्षुरिषितं मनः । सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीः। तच्चक्षुर्देवहितं शुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतम् । त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः । शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः । वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमावीरावीर्म एधि वेदस्य म आणी स्थः श्रुतं मे मा प्र हासीरनेनाऽऽधीतेन । अहोरात्रान्त्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारम्' इति ।

[ऐतरेयारण्यकम्]

**अथ महाव्रतम् । इन्द्रो वै वृत्रं हत्वा महानभवद् यन्महानभवत्**

**[ सायणभाष्यम् ]**

वागीशाद्याः सुमनसः सर्वार्थिनामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ।।१।।
यस्य निश्वसितं[२] वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ।।२।।
तत्कटाक्षेण तद्रूपं दधद् बुक्कमहीपतिः ।
आदिशत् सायणाचार्यं वेदार्थस्य प्रकाशने ।।३।।
ये पूर्वोत्तरमीमांसे ते [३]व्याख्यायात्मसंग्रहात्[३] ।
कृपालुः सायणाचार्यो वेदार्थं वक्तुमुद्यतः ।।४।।
ऐतरेयब्राह्मणेऽस्ति काण्डमारण्यकाभिधम् ।
अरण्य एव[४]पाठ्यं स्यादारण्यकमितीर्यताम्[४] ।।५।।
आरण्यकानि पञ्चेति प्रोक्तान्यर्थविभेदतः ।
महाव्रतमहः प्रोक्तं प्रथमारण्यके स्फुटम् ।।६।।
गवामयनमित्युक्ते सत्रे संवत्सरात्मके ।
उपान्त्यमस्ति यदहस्तन्महाव्रतनामकम् ।।७।।
[५]सत्रप्रकरणेऽनुक्तिररण्याध्ययनादिति[५] ।
महाव्रतस्य तस्यात्र हौत्रं कर्म विविच्यते ।।८।।

तत्रादौ विवक्षितमर्थं प्रतिजानीते—**अथ महाव्रतम्** इति । अथशब्द आरम्भवाची । महाव्रताख्यं कर्म प्रारब्धमित्यर्थः । अथवाऽयमानन्तर्यार्थोऽथशब्दः । प्रकृतिज्ञानानन्तरं विकृतिरूपं महाव्रताख्यं कर्माभिधीयत इति शेषः । प्रकृतिज्ञाने हि सति तत्सकाशाद्[६] विकृतावतिदिष्टा धर्माः साकल्येनावबोद्धुं शक्यन्ते। विश्वजिच्चतुर्विंशादीनि कर्माणि महाव्रतस्य प्रकृतयः । आज्यप्रउगनामके द्वे शस्त्रे विश्वजिदाख्यात्[७] कर्मणो महाव्रतेऽतिदिश्येते । होत्रकाणां शस्त्राणि तु[८] चतुर्विंशाख्यात् कर्मणोऽतिदिश्यन्ते । तथा च पञ्चमारण्यके पठिष्यते— 'आज्य-

२. **निःश्व°** क.
३-३. **व्याख्यायातिसंग्रहात्** रा.
४-४. **पाठ्यत्वादारण्यकमितीर्यते** रा. (राजेन्द्रलाल मित्र संस्करणम्)
५-५. **°नुक्तकरणाध्य°** घ. अ.
६. **ततो** रा.
७. **ख्यान्च** ख.ग.घ.अ (=अडियार पुस्तकालय-हस्तलेखः)
८. नास्ति रा.

**तन्महाव्रतस्य महाव्रतत्वम् ।**

---

प्रउगे विश्वजितः । होत्राश्चतुर्विंशत्' । (ऐआ ५. १.१) इति।

महाव्रतं प्रशंसितुमाख्यायिकामुखेन तच्छब्दनिर्वचनं दर्शयति–**इन्द्रो वै वृत्रं हत्वा महानभवद् यन्महानभवत् तन्महाव्रतमभवत् तन्महाव्रतस्य महाव्रतत्वम्** इति। वृत्रवधस्य श्रुत्यन्तरप्रसिद्धिद्योतनार्थो वैशब्दः । तैत्तिरीयके दर्शपूर्णमासब्राह्मण-शेषे 'त्वष्टा हतपुत्रः' (तैसं २.४.१२) इत्यस्मिन्ननुवाके वृत्रनाम्नोऽसुरस्योत्पत्ति-वृद्ध्यादिकं बहुना प्रपञ्चेनाभिधायान्ते द्यावापृथिवीभ्यामनुज्ञातेनेन्द्रेण कृतो वृत्रवध एवमाम्नायते–'स आभ्यामेव प्रसूत इन्द्रो वृत्रमहन्' (तैसं २.५.२.६) इति । एवमन्यत्रापि –'इन्द्रो वृत्राय वज्रं प्राहरत्' (तैसं २.५.६.२), 'इन्द्रो वृत्राय वज्रमुदयच्छत्' (तैसं ६.५.१.१), 'इन्द्रो वृत्रं हत्वा' (तैसं २.५.३.१) इत्यादिषु प्रसिद्धिर्द्रष्टव्या । ईदृशात् प्रसिद्धाद् वृत्रवधाद् ऊर्ध्वम् इन्द्रो महानभवत् । भीतिराहित्यमस्य महत्त्वम् । वृत्रवधात्पुरा तु स्वकीयां भीतिं स्वयमेव प्रजापतेरग्रे प्रोवाच । तथा च तैत्तिरीया आमनन्ति–'तस्मादिन्द्रोऽबिभेत् स प्रजापतिमुपाधावच्छत्रुर्मेऽजनि' (तैसं २.५.२.५) इति । इत्थं भीतस्य त्विच्छया[९] बहुषु देशेषु संचारासंभवात् स्वगृहे च निद्राभोजनादौ बिभ्यतः स्वास्थ्याभावा-दल्पत्वम् । अतो निर्भयत्वमेव महत्त्वम् । यद् यदाऽसाविन्द्रो महानभवत् [१०]तत् तदानीम्[१०] इन्द्रार्थं क्रियमाणं सोमपानविशेषात्मकं कर्म महाव्रतमभवत्, तत् तस्मात्कारणाद् याज्ञिकैर्महाव्रतमिति व्यवह्रियमाणस्य कर्मणो महाव्रतनामकत्वं संपन्नम् । तस्य च नाम्नस्त्रेधा निर्वचनं द्रष्टव्यम् – महान्भवत्यनेन व्रतेनेति महाव्रतं, महतो देवस्य व्रतमिति महाव्रतं, महच्च तद्व्रतमिति महाव्रतमिति एतानि त्रीणि निर्वचनानि तैत्तिरीया आमनन्ति–' प्रजापतिः प्रजाः सृष्ट्वा वृत्तोऽशयत्। तं देवा भूतानां रसं तेजः संभृत्य । तेनैनमभिषज्यन् । महानववर्तीति। तन्महाव्रतस्य महाव्रतत्वम् । महतो व्रतमिति । तन्महाव्रतस्य महाव्रतत्वम्' (तैब्रा १.२.६.१) इति । वृत्तोऽशयत् श्रान्तो भूमावपतत् । तदानीं ते देवा-स्तेजोभूतं तं द्युलोकाद् गायत्र्या समानीतं रसायनरूपं सोमं महाव्रताङ्गभूतैर्मन्त्रैः संपाद्याथ प्रजापतिं तेन सोमेन चिकित्सित्वा महानववर्तीति श्रमरहितो वृत्तोऽनेन कर्मणेत्युक्तवन्तः । छन्दोगैरपि महद्व्रतं महतो व्रतमिति निरुक्तिद्वयमाम्नातम् –'प्रजापतिः प्रजा असृजत । सोऽरिच्यत । सोऽपद्यत । तं देवा अभिसंगच्छन्त । तेऽब्रुवन् । महदस्मै व्रतं संभराम । यदिमं धिनवदिति । तस्मै तत्संवत्सरमन्नं पच्यते । तत्संभरदस्मै प्रायच्छंस्तदव्रजयन्त तदेनमधिनोन्महन्मर्या व्रतं यदिममधिन्वीदिति । तन्महाव्रतस्य महाव्रतत्वम् । प्रजापतिर्वाव महांस्तस्यै-

---

९. **स्वेच्छया** रा.

१०-१०. **तदिदा°** क.

**द्वे एतस्याह्न आज्ये कुर्यादिति हैक आहुरेकमिति त्वेव स्थितम् । प्र वो देवायाग्नय इति राद्धिकामः । विशोविशो वो अतिथिमिति पुष्टिकामः ।**

---

तद्व्रतम्' (तांब्रा ४.१०.१) इति । अरिच्यत शक्त्या रिक्तोऽभूत् । अपद्यत भूमौ पतितः । धिनवत् प्रीणयति[11] अव्रजयत् प्राप्नोत् । अधिनोद् अप्रीणयत् । हे मर्या मरणयोग्या मनुष्या यद् व्रतमिमं प्रजापतिमधिन्वीदप्रीणयत् तद् व्रतं महदिति देवा उक्तवन्त इत्यर्थः ।

इत्थं महाव्रतं प्रशस्य तत्र प्रातःसवने होत्रा शंसनीय आज्यनामके शस्त्रे पूर्वपक्षसिद्धान्तौ दर्शयति – **द्वे एतस्याह्न आज्ये कुर्यादिति हैक आहुरेकमिति त्वेव स्थितम्** इति । एतस्य महाव्रताख्यस्याह्नः प्राकृतं वैकृतं चेत्येवं द्वे आज्यशस्त्रे कुर्यात् । 'प्र वो देवायाग्नये' (ऋ ३.१३.१) इति सप्तर्चं सूक्तमाज्यशस्त्रत्वेनाग्निष्टोमेऽभिहितत्वात्[12] प्राकृतम् । 'अग्निं नरो दीधितिभिः' (ऋ ७.१.१) इति पञ्चविंशत्यृचं सूक्तम् आज्यशस्त्रत्वेन विश्वजिति विधानाद्[13] वैकृतम् । ते द्वे अपि प्राकृतवैकृते आज्ये अस्मिन् महाव्रते कुर्यादित्येवमेके शाखान्तरीया[14] आहुः । सोऽयं पूर्वः पक्षः । तस्य पूर्वपक्षस्य व्यावृत्त्यर्थस्तुशब्दः। द्वे आज्ये न कुर्यात्, किन्तु विशेषविधानाद् वैकृतमेकमाज्यं कुर्यादित्येव सिद्धान्तरहस्यं स्थितम् । यदाऽऽज्ये शस्त्रद्वयमङ्गीक्रियेत तदानीमग्निष्टोम-संस्थेऽस्मिन् महाव्रते प्रकृतितः प्राप्तेभ्यो द्वादशभ्यः शस्त्रेभ्योऽधिकं शस्त्रं प्राप्नुयात् । तच्चायुक्तम्, 'द्वादशाग्निष्टोमस्य स्तोत्राणि, द्वादश शस्त्राणि[15] इति श्रुत्यन्तर-विरोधात् । तदेवमत्र नित्यमाज्यशस्त्रं व्यवस्थापितम् ।

अथ काम्यान्याज्यशस्त्राण्युच्यन्ते । तत्र समृद्धिफलाय शस्त्रविशेषं विधत्ते–**'प्र वो देवायाग्नये' (ऋ ३.१३.१) इति राद्धिकामः** इति । तच्च सप्तर्चं सूक्तमिति पूर्वमेवाभिहितम् ।

पुष्टिफलाय सूक्तान्तरं विधत्ते – **विशोविशो वो अतिथिम् (ऋ ८.७४.१) इति पुष्टिकामः** इति । एतच्च सूक्तं पञ्चदशर्चम् ।

तस्य पुष्टिहेतुत्वमुपपादयति–**पुष्टिर्वै विशः पुष्टिमान् भवतीति** इति । विशो [वै]श्यास्ते हि वाणिज्येन बहुधनमर्जयन्तः करमपि बहुलं प्रयच्छन्ति । अतो विशां [पु]ष्टित्वम् । अस्मिन्नर्थे लोकप्रसिद्धिर्वैशब्देनोच्यते । सूक्ते तु विशोविश इति वीप्सया बहुविधानां वैश्यानामभिहितत्वात् तेन सूक्तेनायं यजमानः पुष्टिमान्

---

११. **प्रीणयत्** रा.
१२. द्र. आश्रौ ५.९. १५
१३. द्र. आश्रौ ८.७.१
१४. द्र. शांआ १.२
१५. द्र. तांब्रा ६.३.३

**पुष्टिर्वै विशः पुष्टिमान् भवतीति । अतिथिमिति पदं भवति नैतत् कुर्यादित्याहुरीश्वरोऽतिथिरेव चरितोः । तदु ह स्माऽऽह कुयदिव । यो वै भवति यः श्रेष्ठतामश्नुते स वा अतिथिर्भवति । न वा असन्त-**

---

भवतीत्येतदुपपन्नम् । इतिशब्दो हेत्वर्थः । यस्मात् पुष्टिमान् भवति तस्मात् पुष्टिकामस्तत्सूक्तं कुर्यात् ।

अत्र पूर्वपक्षत्वेन तत्सूक्तं दूषयति – **अतिथिमिति पदं भवति नैतत् कुर्यादित्याहुरीश्वरोऽतिथिरेव चरितोः** इति । अस्मिन् सूक्ते दरिद्रस्य वाचकम् अतिथिमिति पदं वर्तते । तस्मान्नैतत्सूक्तं कुर्यादित्येवं केचित् पण्डितंमन्या आहुः । तत्रोपपत्तिं च वर्णयन्ति—य एतदाज्यं कुर्यात् सोऽयमतिथिरेव दरिद्र एव भूत्वा याच्ञार्थं परगृहेषु सर्वदा चरितुं प्रभुर्भवतीति ।

[१६]अत्र सिद्धान्तत्वेन तस्य सूक्तस्य प्रसङ्गं च विधत्ते[१६] —**तदु ह स्माऽऽह कुयदिव** इति । अतिथिपदतात्पर्याभिज्ञः सिद्धान्ती [१७]तदु ह[१७] सूक्तमवश्यं कुर्यादित्याह स्म ।

पूर्वपक्षोक्तदूषणशमनार्थम् अतिथिशब्दतात्पर्यं दर्शयति—**यो वै भवति यः श्रेष्ठतामश्नुते स वा अतिथिर्भवति** इति । [१८]अत्रास्तिवाची[१८] भूधातुः सन्मार्गवर्तिनं ब्रूते । यस्तु पुमान् सन्मार्गवर्ती भवति तस्मिन्नपि सन्मार्गवर्तिसंघे यः पुमान् अतिशयेन प्राशस्त्यं प्राप्नोति स एवातिथिर्भवति । अतः प्राशस्त्यमत्र शब्दप्रवृत्तिनिमित्तं न तु दारिद्र्यम् ।

एतदेव व्यतिरेकमुखेन स्पष्टयति[१९] —**न वा असन्तमातिथ्यायाऽऽद्रियन्ते** इति। सन्मार्गरहितं व्रात्याभिशस्तादिकं पुरुषम् अत्यन्त-दरिद्रमप्यातिथ्यसत्काराय[२०] नाऽऽद्रियन्ते ।

सिद्धान्तं निगमयति—**तस्मादु काममेवैतत् कुर्याद्** इति । यस्माद् अतिथिशब्दो न दुष्टः, किन्तु प्रशस्तस्तस्मादेव कारणाद् विस्रम्भेणैवैतत्सूक्तं कुर्यात् ।

तत्सूक्तप्रयोगे कंचिद् विशेषं विधत्ते—**स यद्येतत् कुर्याद् 'आगन्म वृत्रहन्तमम्' (ऋ ८.७४.४) इत्येतं तृचं प्रथमं कुर्याद्** इति । तस्मिन् सूक्ते 'विशो विशः' (ऋ ८.७४.१) इत्यादिकः प्रथमस्तृचः । 'आगन्म' इत्यादिको द्वितीय-स्तृचः । प्रयोगकाले त्वागन्मेत्यादिकं प्रथमत्वेन पठेत् ।

तत्रोपपत्तिमाह— **एतद्वा अहरीप्सन्तः संवत्सरमासते त आगच्छन्ति** इति । ये

---

१६-१६. **अत्र सिद्धान्तत्वेनैतत्सूक्तविधानार्थं प्रतिप्रसवं विधत्ते** रा.

१७-१७. **तदु ह तदेव** रा.

१८. **सत्तावाची** रा.

१९. **व्यवस्यति** अ.

२०. **°तिथ्याय सत्काराय** अ.

**मातिथ्यायाऽऽद्रियन्ते । तस्मादु काममेवैतत् कुर्यात् । स यद्येतत् कुर्याद् 'आगन्म वृत्रहन्तमम्' इत्येतं तृचं प्रथमं कुर्यात् । एतद् वा अहरीप्सन्तः संवत्सरमासते त आगच्छन्ति । त एतेऽनुष्टुप्शीर्षाणस्त्रयस्तृचा भवन्ति ब्रह्म वै गायत्री वागनुष्टुब् ब्रह्मणैव तद् वाचं संदधाति । 'अबोध्यग्निः**

---

गवामयननामकं संवत्सरसत्रमनुतिष्ठन्ति ते महाव्रताख्यम् एतदेवोपान्त्यम् अहः प्राप्तुमिच्छन्तोऽनुतिष्ठन्ति । तथा सत्यागन्मेति प्राप्तिवाचकं शब्दं प्रयुञ्जानास्ते पुरुषा एतदहरागच्छन्ति तस्माद् एतस्य प्राथम्यं युक्तम् ।

अतिथिमागन्मेति पदद्वयतात्पर्यदर्शनेन तृचद्वयं व्याख्यातम् । अथावशिष्टानां तृचानां तात्पर्यं दर्शयति– **त एतेऽनुष्टुप्शीर्षाणस्त्रयस्तृचा भवन्ति ब्रह्म वै गायत्री वागनुष्टुब् ब्रह्मणैव तद् वाचं संदधाति** इति । पञ्चदशर्चे 'विशोविशः' (ऋ ८.७४.१) इत्यादिके सूक्ते प्रथमतस्तृचद्वये गते सति तत ऊर्ध्वं त्रयस्तृचाः शिष्यन्ते[२१], तेष्वन्तिमस्तृचः 'अहं हुवानः' इत्यादिकोऽनुष्टुप्छन्दस्कः । [२२]तत्रानुष्टुप्छन्दसि तदुत्तमाङ्गस्थानं[२२] येषां तृचानां[२३] तेऽनुष्टुप्शीर्षाणः । एते तृचास्त्रिसंख्याकाः । तत्रोपान्त्यतृचे ततः पूर्वतने तृचे च गायत्री छन्दो विद्यते। सा च गायत्री ब्रह्मैव, 'तत् सवितुर्वरेण्यम्' (ऋ ३.६२.१०) इत्यनया गायत्र्या परब्रह्मणः प्रतिपाद्यत्वात्। येयं तृचगताऽनुष्टुप् सा वाग्रूपा चतुष्पात्त्वसामान्यात्। 'चत्वारि वाक् परिमिता पदानि' (ऋ १.१६४.४५) इति वाचः पादचतुष्टयमाम्नातम्। परा पश्यन्ती मध्यमा [२४]वैखरीत्युक्तं यत्पादचतुष्टयम्[२४] अन्यैर्व्याख्यातम् (द्र.वा.प. १.१४३)। अनुष्टुभस्तु चतुष्पात्त्वं प्रसिद्धम्। एवं सत्यस्मिन् सूक्ते गायत्र्यनुष्टुभोर्मेलने सति तन्त्रेण[२५] सूक्तपाठेन ब्रह्मणैव वाचं संयोजयति।

अथ कीर्तिफलार्थं सूक्तान्तरं विधत्ते– **अबोध्यग्निः समिधा जनानाम्** (ऋ ५.१.१) **इति कीर्तिकामः** इति। अबोधीत्यादिकं द्वादशर्चं सूक्तम्।

प्रजापशुफलार्थम् अन्यत्सूक्तं विधत्ते– **होताऽजनिष्ट चेतनः** (ऋ २.५.१) **ति प्रजापशुकामः** इति। होतेत्यादिकम् अष्टर्चं सूक्तम्। यथोक्तानां[२६] काम्यसूक्तानां गोदोहनन्यायेन फलार्थत्वमेव न तु[२७] क्रत्वर्थत्वम्।

स च न्यायश्चतुर्थाध्यायस्य प्रथमपादे चिन्तितः।

"गोदोहनं द्वयार्थं स्यान्न वा[२८] भानाद् द्वयार्थता।

---

२१. **अवशिष्यन्ते** रा.
२२-२२. **°छन्दः शिर उत्तमा°** रा.
२३. **स्थानं** ख.
२४-२४. **वैखरीत्येवं पाद°** रा.
२५. **तत्तेन** रा.
२६. **अत्र यथो°** रा.
२७. नास्ति क.
२८. **च** क.

**समिधा जनानाम्' इति कीर्तिकामः। 'होताऽजनिष्ट चेतनः' इति प्रजापशुकामः।**

।।इत्यैतरेयब्राह्मणारण्यकाण्डे प्रथमारण्यके प्रथमेऽध्याये प्रथमः खण्डः।।

---

अन्यथाऽपि क्रतोः सिद्धेः केवलं पुरुषाय तत् ।। ''

दर्शपूर्णमासयोः श्रूयते – 'चमसेनापः प्रणयेत्' (आपश्रौ १.१५.३), 'गोदोहनेन पशुकामस्य' (आपश्रौ १.१६.३) इति। तत्र गोदोहनस्य क्रत्वर्थत्वं पुरुषार्थत्वं चेत्याकारद्वयमस्ति। पशुफलजननेन पुरुषप्रीतिर्भाति, अपां प्रणयनेन क्रतुपौष्कल्यमपि भातीति चेत्, मैवम्। गोदोहनमन्तरेण फलासिद्धेर्भवतु पुरुषार्थत्वं क्रतुस्तु तदभावेऽपि[२९] चमसेन सिध्यतीति न क्रत्वर्थता'' (जै. न्या. ४.१.२) । एवमत्रापि[३०] यथोक्तानि काम्यसूक्तानि फलार्थान्येव न तु क्रत्वर्थानि। एवं तर्हि क्रतोरङ्गवैकल्यं प्रसज्येतेति चेत्, मैवम्। काम्यानामेतेषां क्रत्वङ्गभूतं शंसनमाश्रित्य विधानमिति[३१] काम्यैरपि[३२] सूक्तैः क्रत्वङ्गस्य शंसनस्य निष्पत्तेः, काम्येन नित्यसिद्धिरिति तान्त्रिकाणां डिण्डिमः[३३]। तस्मात् फलसाधनत्वेन विधानात् एतैः फलं साक्षात् सिध्यति। अर्थात् क्रतोः साङ्गत्वमित्युपपन्नम्[३४]।

**।।इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणारण्यककाण्डभाष्ये प्रथमारण्यके प्रथमाध्याये प्रथमः खण्डः।।१।।**

अन्नाद्यफलाय सूक्तान्तरं विधत्ते– **'अग्निं नरो दीधितिभिररण्योः' (ऋ ७.१.१) इत्यन्नाद्यकामः** इति। अत्तुं योग्यं आद्यं शाल्यादिनिष्पन्नमन्नम्। अन्नं च तदाद्यं चेत्यन्नाद्यं तस्मिन् कामोऽस्य। अग्निं नर इत्यादिकं पञ्चविंशत्यृचम् आज्यशस्त्रम् अवगन्तव्यम्।

अस्य सूक्तस्यान्नहेतुत्वं संभावयति– **अग्निर्वा अन्नादः** इति । अग्नेरन्नभोजकत्वे[१] लोकप्रसिद्धिद्योतनार्थो वैशब्दः। अग्नेः स्वयमन्नभोजकत्वेनान्नप्रियत्वात् तद्विषयसूक्तेनान्नलाभो युक्त इत्यर्थः।

ननु 'प्र वो देवायाग्नये' (ऋ ३.१३.१) इत्यादिसूक्तेष्वप्यग्निर्विद्यत इत्या-

---

२९. **°ऽपि नास्ति** क.
३०. **एवमन्यान्यपि** अ.
३१. **विधाने सति** रा.
३२. **काम्यैः** अ.
३३. **विदितम्** रा.
३४. **°मित्युभयमुप°** रा.
१. **°न्नभक्षकत्वे** रा.

**अग्निं नरो दीधितिभिररण्योरित्यन्नाद्यकामः। अग्निर्वै अन्नादः। चिरतरमिव वा इतरेष्वाज्येष्वग्निमागच्छन्त्यथेह मुखत एवाग्निमागच्छन्ति मुखतोऽन्नाद्यमश्नुते मुखतः पाप्मानमपघ्नते। हस्तच्युती जनयन्तेति जातवदेतस्माद्वा अह्नो यजमानो जायते तस्माज्जातवत्। तानि चत्वारि**

---

शङ्क्य तेभ्योऽस्ये[2] सूक्तस्य विशेषं दर्शयति— **चिरतरमिव वा इतरेष्वाज्येष्वग्निमागच्छन्त्यथेह मुखत एवाग्निमागच्छन्ति मुखतोऽन्नाद्यमश्नुते मुखतः पाप्मानमपघ्नते** इति। इतरेषु [3]'प्र वो देवायाग्नये' (ऋ ३.१३.१) इत्यादिष्वाज्यशस्त्रेषु यजमाना अत्यन्तविलम्बो यथा*भवति तथैवाग्निं प्राप्नुवन्ति।[3] सूक्तादावग्निपदाभावात्। इह तु तत्सद्भावाद् आदावेव सहसाग्निं प्राप्नुवन्ति।`[4]अतो भवदा (?°तोऽन्ना) द्यमादौ[4] विलम्बमन्तरेणैव यजमानसंघः प्राप्नोति। तथा ते यजमाना आदावेव पाप्मानं नाशयन्ति।

सूक्तस्य प्रथमपादेऽग्निं शब्दं प्रशस्य द्वितीयपादे जनयन्तेति शब्दं प्रशंसति —**हस्तच्युती जनयन्तेति जातवदेतस्माद्वा अह्नो यजमानो जायते तस्माज्जातवद्** इति। हस्तेत्यादिर्द्वितीयपादस्तस्यायमर्थः[5]—हस्तव्यापारेणैव[6] जनयन्त यजमाना अग्निमुत्पादयन्त इति। तत्र जनयन्तेत्यनेन शब्देनेदं सूक्तं जातवज्जन्मवाचकशब्दोपेतं[7] भवति। एतस्माज्जन्मवाचिशब्दोपेतसूक्तयुक्ताद् अह्नो महाव्रताख्यात् कर्मणो यजमानोऽयं तत्फलयोग्यजन्मवान् भवति। तस्मात् कारणात् तथाविधजन्मसाधनभूतं सूक्तम्[8]।

अस्मिन् पञ्चविंशत्यृचे सूक्ते (ऋ ७.१) आदावष्टादशर्चो विराट्छन्दस्काः। अवशिष्टास्तु 'मा नो अग्नेऽवीर ते' इत्यादिकाः सप्तर्चस्त्रिष्टुप्छन्दस्काः। तास्वेकैकस्यामृचि पादचतुष्टययुतानि[9] च्छन्दांसि प्रशंसति— **तानि चत्वारि च्छन्दांसि भवन्ति चतुष्पादा वै पशवः पशूनामवरुद्ध्यै** इति। 'एकादशाक्षरा त्रिष्टुप्' (तैसं ३.४.९.७) इति श्रुत्यन्तराद् एकैकस्मिन् पाद एकैकं त्रिष्टुबाख्यं छन्दोऽस्ति। ततश्चतुर्षु पादेषु चत्वारि त्रिष्टुप्छंदांसि संपद्यन्ते। ततः पशूनां [10]चतुष्पात्त्वात् तेन[10] तत्साम्यात् पशुप्राप्तिर्भवति।

यास्तु सूक्तादिगता विराट्छन्दस्का ऋचस्तासां पादगतानि च्छन्दांसि

---

२. **ततोऽस्य** रा.

३-३. नास्ति अ. ***यथा न्** क. ख

४-४. **अतोऽनवद्यम् । आदौ** रा.

५. °तीयः **पाद**° क.

६. **°णैव वाच्येन आन, °णेव वाच्येनं अ., हस्तच्युती हस्तंव्यापारेण मथनाख्येन** रा.

७. **°शब्दवद्** रा.

८. **सूक्तं जन्मवाचिशब्दोपेतमित्येतद् युक्तम्** रा.

९. **°युक्तानि** क. ख. ग. **°ष्टयगतानि** रा.

१०-१०. **चतुष्पात्त्वेन** रा.

**च्छन्दांसि भवन्ति चतुष्पादा वै पशवः पशूनामवरुद्ध्यै । तानि त्रीणि च्छन्दांसि भवन्ति त्रयो वा इमे त्रिवृतो लोका एषामेव लोकानामभिजित्यै। ते द्वे छन्दसी भवतः प्रतिष्ठाया एव द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमानमेव तद् द्विप्रतिप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति। ताः पराग्वचनेन पञ्चविंशतिर्भवन्ति पञ्चविंशोऽयं पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या द्वा ऊरू द्वौ बाहू आत्मैव पञ्चविंशस्तमिममात्मानं पञ्चविंशं संस्कुरुते । अथो पञ्चविंशं वा एतदहः पञ्चविंश एतस्याह्नः**

---

प्रशंसति – **तानि त्रीणि च्छन्दांसि भवन्ति त्रयो वा इमे त्रिवृतो लोका एषामेव लोकानामभिजित्यै** इति। यथा 'चतुष्पदा त्रिष्टुप्' (तैसं ३.२.९.१.), 'एकाक्षरा त्रिष्टुप्' (तैसं ३.४.९.७.) इति श्रुत्योः पादसंख्याऽक्षरसंख्या च श्रुता तथा 'त्रिपदा विराट्' (मैसं ३.४.६.), 'दशाक्षरा विराट्' (तैसं २.६.१.२.) इति श्रुत्योः[११] संख्याद्वयं श्रुतम्। ततस्त्रिष्वपि पादेषु दशाक्षरसंख्याकानि त्रीणि विराट्च्छन्दांसि संपद्यन्ते। लोकाश्च पृथिव्यन्तरिक्षं द्यौरित्येवं त्रिसंख्याकाः, उत्तममध्यमाधमैः सात्त्विकराजसतामसैः प्राणिभिरुपेतत्त्वात् त्रिवृतश्च। ततः[१२] संख्यासाम्याल्लोकजयो भवति।

सूक्ते पूर्वोत्तरभागयोर्वर्तमाने विराट्त्रिष्टुबित्येते द्वे छन्दसी प्रशंसति – **ते द्वे छन्दसी भवतः प्रतिष्ठाया एव द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमानमेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति इति।** छन्दोद्वयं[१३] प्रतिष्ठार्थमेव संपद्यते। लौकिकः पुरुषः सर्वोऽपि भूमौ द्वाभ्यां पादाभ्यां प्रतिष्ठितत्वाद् द्विप्रतिष्ठो भवति। पशवस्तु चतुष्पादाः। एवं सति च्छन्दोद्वित्वेन पादचतुष्ट्वेन च द्विपादं यजमानं चतुष्पात्सु पशुषु होता प्रतिष्ठापयति।

इदानीं सर्वास्वृक्ष्ववस्थितां पञ्चविंशतिसंख्यां प्रशंसति – **ताः पराग्वचनेन पञ्चविंशतिर्भवन्ति पञ्चविंशोऽयं पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या द्वा ऊरू द्वौ बाहू आत्मैव पञ्चविंशस्तमिममात्मानं पञ्चविंशं संस्कुरुते** इति। आवृत्तिमन्तरेणोर्ध्वपाठः पराग्वचनम्। आत्मा मध्यदेहः[१४], 'मध्यं ह्येषामङ्गानामात्मा' (ऐआ २.३.५.) इति वक्ष्यमाणत्वात्। तेनात्मना सहितैरवयवैः सर्वैरयं पुरुषः पञ्चविंशतिसंख्योपेतः। अतस्तादृशं पुरुषम् ऋग्गतया पञ्चविंशतिसंख्यया संस्करोति[१५]।

प्रकारान्तरेण तां संख्यां प्रशंसति– **अथो पञ्चविंशं वा एतदहः पञ्चविंश**

---

११. श्रुत्योस्तु रा. १२. अतः रा.
१३. छन्दोद्वित्वं रा.
१४. देहम् ख. ग.
१५. संस्कृतं करोति अ.

**स्तोमस्तत्समेन समं प्रतिपद्यते तस्माद् द्वे एव पञ्चविंशतिर्भवन्ति । तास्त्रिः प्रथमया त्रिरुत्तमयैकयानत्रिंशन्न्यूनाक्षरा विराण् न्यूने वै रेतः सिच्यते न्यूने प्राणा न्यूनेऽन्नाद्यं प्रतिष्ठितमेतेषां कामानामवरुद्ध्यै । एतान् कामानवरुन्द्धे य एवं वेद। ता अभिसंपद्यन्ते बृहती च विराजं च**

---

**एतस्याह्नः[१६] स्तोमस्तत्समेन समं प्रतिपद्यते तस्मात् द्वे एव पञ्चविंशतिर्भवन्ति** इति। अथो अपि चेत्यर्थः। यन्महाव्रताख्यमहस्तदेतत् पञ्चविंशतिसंख्योपेतमेव। तत्कथमिति तदुच्यते – एतस्याह्नो यः स्तोमः सामगैः स्तोत्रकाले[१७] तृचस्याऽऽवृत्त्या संपद्यते सोऽयं त्रिवृत्पञ्चदशादिरूपो न भवति किन्तु पञ्चविंशस्तस्मात् कारणात् पञ्चविंशतिसंख्यया समेन सूक्तेन पञ्चविंशतिस्तोमयुक्तं समं तदहः [१८]प्राप्नोतीति तस्माद्[१८] एतदहः सूक्तं चेत्युभयं समं तस्माद् एते द्वे अहःसूक्ते पञ्चविंशतिसंख्याप्रयुक्ते[१९] एव भवतः। अन्यथा साम्यासंभवात्। भवन्तीति बहुवचनं तु सूक्तगतानामृचां स्तोत्रगतानां चापेक्षया द्रष्टव्यम्।

तस्मिन् सूक्ते प्रथमोत्तमयोर्ऋचोरावृत्तिविधिमभिप्रेत्य तदावृत्तिसहितां संख्यां प्रशंसति– **तास्त्रिः प्रथमया त्रिरुत्तमयैकयानत्रिंशन्[२०] न्यूनाक्षरा विराण् न्यूने वै रेतः सिच्यते न्यूने प्राणा न्यूनेऽन्नाद्यं प्रतिष्ठितमेतेषां कामानामवरुद्ध्यै** इति। ताः सूक्तगताः पञ्चविंशतिसंख्याका ऋचस्त्रिरावृत्तया प्रथमया त्रिरावृत्तया चोत्तमया सहिताः सत्यो मिलिता एकोनत्रिंशत्संख्याकाः संपद्यन्ते। एकयर्चा न संपूर्णा त्रिंशदित्येकयोनत्रिंशत्[२१], त्रिंशदक्षरा विराट् (तैब्रा १. ६. ३. ४) इति श्रुतेर्विराट्छन्दसस्त्रिंशत्संख्योपेतत्वाद् अत्र त्रिंशत्संख्यायाम् एकया न्यूनत्वाद् इयमृक्संख्या न्यूनाक्षरा विराट् संपद्यते। लोकेऽपि न्यूने वै स्वल्प एव गर्भाशये प्रजोत्पादनार्थं रेतः सिच्यते। तथा स्वल्पे हृदयपुण्डरीके प्राणाः प्रतितिष्ठन्ति, स्वल्पे चोदरेऽन्नाद्यं प्रतिष्ठितं[२२], तस्मादियं न्यूना[२३] विराड् एतेषां प्रजोत्पत्तिप्राणान्नप्रतिष्ठारूपाणां कामानां प्राप्त्यै संपद्यते।

यथोक्तार्थवेदनं प्रशंसति– **एतान् कामानवरुन्द्धे य एवं वेद** इति। यः पुमान् एवम् ऋग्गताम् एकोनत्रिंशत्संख्यां वेद स पुमान् उक्तान् कामानाप्नोति। वेदनमात्रेण फलप्राप्तिर्यजुर्वेदार्थप्रकाशे (उपोद्घाते) उपपादिता।

प्रकारान्तरेण सूक्तगता ऋचः प्रशंसति– **ता अभिसंपद्यन्ते बृहतीं च विराजं च च्छन्दो यैतस्याह्नःसंपत् तामथो अनुष्टुभमनुष्टुबायतनानि ह्याज्यानि** इति। या

---

१६. °ह्न कीथः
१७. **स्तोमकाले** रा.
१८. **प्राप्नोति । यस्माद्** रा.
१९. **संख्यायुक्ते** रा.
२०. °**कया न त्रिंश**° कीथः
२१. °**त्रिंशदिति योजना** रा.
२२. °**तं भवति** रा.
२३. **न्यूनाक्षरा** रा.

**च्छन्दो यैतस्याह्नः संपत् ताम् अथो अनुष्टुभम् अनुष्टुबायतनानि ह्याज्यानि।**

।।इत्यैतरेयब्राह्मणारण्यकाण्डे प्रथमारण्यके प्रथमाध्याये द्वितीयः खण्डः ।।२।।

ऋचः सूक्ते प्रोक्ताः 'अग्निं नरः' (ऋ ७.१) इत्यादिकास्ताः सर्वा ऋचो मिलित्वा बृहत्याख्यच्छन्दोऽ[२४]भिसंपद्यन्ते। तथा विराडाख्यं छन्दोऽभिसंपद्यन्ते। एवं सत्येतस्य महाव्रतस्याह्नोऽपेक्षिता[२५] या संपत् तां प्राप्ता भवन्ति। तत्रा-ऽऽदावष्टादशानामृचां स्वत एव विराडभिसंपत्तिः सिद्धा। यास्तूत्तराः सप्त त्रिष्टुभस्तासु बृहतीछन्दः संपादनीयम्। अन्तिमाया ऋचस्त्रिरावृत्तौ सत्यां नव त्रिष्टुभः संपद्यन्ते। तासु प्रत्येकम् अष्टाक्षरेष्वतीतेष्ववशिष्टा[२६] नव बृहत्यो भवन्ति। अपनीताश्च नवसंख्याका अष्टाक्षरपादा मिलित्वा द्वासप्ततिरक्षराणि संपद्यन्ते[२७]। तत् षट्त्रिंशदक्षरोपेते द्वे बृहत्यौ निष्पद्येते। तदेवं बृहतीछन्दः-संपत्तिः। अपि[२८]चैवम् आद्यायामृच्यनुष्टुप्त्वस्य[२८] संपादयितुं शक्यत्वात् ताः सूक्तगता ऋचोऽनुष्टुभमभिसंपद्यन्ते । यद्यप्याद्यायास्त्रयस्त्रिंशदक्षरत्वात् एक-मक्षरम् अनुष्टुभोऽधिकं तथापि नैतावताऽनुष्टुप्त्वं हीयते, न वा एकेनाक्षरेण च्छन्दांसि वियन्ति न द्वाभ्याम्' (ऐब्रा १.६.) इति श्रुतेः। यथैवास्यामृच्य-क्षरत्रयाधिकत्वेऽपि विराट्त्वम् अनुक्रमणिकाकारैरुक्तम् एकाक्षराधिक्येऽनुष्टुप्त्वं किं न स्यात् । न चैतावता प्रयासेनानुष्टुप्संपादने[२९] प्रयोजनाभावः । यस्माद् आज्यशस्त्राण्यनुष्टुबाश्रितानि 'प्र वो देवायाग्नये' (ऋ ३.१३.१) इत्यादौ तथा दृष्टत्वात् तस्माद् अनुष्टुप्संपत्त्या प्रशस्तमिदं सूक्तमित्यभिप्रायः। नन्वेतत्सूक्तम् अन्नाद्यकामस्य विधीयत इति पुरुषार्थमिदं तथा क्रत्वर्थत्वमप्यस्य चोदकेन[३०] प्रापितम् । तथा हि 'आज्यप्रउगे विश्वजितः' (ऐआ ५.१.१) इति पञ्चमा-रण्यके वक्ष्यते। विश्वजिन्नाम्न एकाहाच्छस्त्रद्वयमतिदेष्टव्यमिति तस्य वाक्यस्यार्थः 'विश्वजितोऽग्निं नरः' (आश्रौ ८.७.१) इति सूत्रकारेणाभिधानाद् विश्वजि-द्विकृतिरूपे महाव्रतेऽपि तदेवातिदिश्यते । तस्माद् एकस्यैव 'अग्निं नरः' (ऋ ७.१.१) इति सूक्तस्य क्रत्वर्थत्वं पुरुषार्थत्वं चेत्युभयविधत्वम् अनुपपन्नम्। नायं दोषः, दधिन्यायेनोपपत्तेः[३१]।

२४. °**ख्यं छ**° रा.
२५. °**व्रताख्यस्या**° रा.
२६. °**ष्वपनीतेष्व**° रा. २७. **भवन्ति ख.** ग.
२८-२८. **च प्रथमायामृ**° रा.
२९. °**नुष्टुप्त्वसं**° रा.
३०. चोदकः = अतिदेशः प्रकृतिवद् विकृतिः कर्तव्येत्यादिरूपः।
३१. **दध्यादिन्या**° रा.

**गायत्रं प्रउगं कुर्यादित्याहुस्तेजो वै ब्रह्मवर्चसं गायत्री तेजस्वी ब्रह्मवर्चसी भवतीति। औष्णिहं प्रउगं कुर्यादित्याहुरायुर्वा उष्णिग् आयुष्मान् भवतीति। आनुष्टुभं प्रउगं कुर्यादित्याहुः क्षत्त्रं वा अनुष्टुप् क्षत्त्रस्याऽऽप्त्या इति। बार्हतं प्रउगं कुर्यादित्याहुः श्रीर्वै बृहती श्रीमान् भवतीति। पाङ्क्तं प्रउगं कुर्यादित्याहुरन्नं वै पङ्क्तिरन्नवान् भवतीति।**

---

स च न्यायश्चतुर्थाध्यायस्य तृतीयपादे चिन्तितः[३२] ।
'दध्ना त्विन्द्रियकामस्य नित्योऽन्यदुत तद्दधि ।
अन्यत् स्यात् पूर्ववन्मैवं संयोगस्य पृथक्त्वतः ।।

अग्निहोत्रे श्रूयते–''दध्नेन्द्रियकामस्य जुहुयात्'' (तैब्रा २.१.५.६) इति। तत्र दध्नः काम्यत्वान्नित्येऽग्निहोत्रे पूर्वन्यायेन तद् दधि न प्रयोक्तव्यं किन्त्वन्यदेव किंचिद् द्रव्यमिति चेत्, मैवम्। 'दध्ना जुहोति' इत्यस्मिन् वाक्यान्तरे कामसंयोगमुपन्यस्य नित्यहोमसंयोगेन दधिविधानात्। तस्माद् एकस्यापि दध्नो वाक्यद्वयेन नित्यत्वं काम्यत्वं चाविरुद्धम् । एवमग्नीषोमीयपशौ 'खादिरे बध्नाति'; खादिरं वीर्यकामस्य यूपं कुर्वीत' (तु. आपश्रौ ७.१.१६) इत्युदाहरणीयम्'' (जैन्या ४.३.३)। अनेन दधिन्यायेनात्रापि काम्येन 'अग्निं नरो दीधितिभिररण्योः' (ऋ ७.१.१) इति सूक्तप्रयोगेण पुरुषार्थेन क्रतुरपि निष्पद्यत इत्येकस्यैव सूक्तस्य चोदकप्रत्यक्षवचनाभ्याम् उभयार्थत्वम् अविरुद्धम्।

**।।इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणारण्यकभागे प्रथमारण्यके प्रथमाध्याये द्वितीयः खण्डः ।।२।।**

ऋतुग्रहभक्षणादूर्ध्वं निवित्पदान्युच्चार्य होत्रा शंसनीयं यदाज्यशस्त्रं तन्निरूपितम्। वैश्वदेवग्रहणादूर्ध्वं होत्रा शंसनीयं प्रउगनामकं यच्छस्त्रं तद्विषयं छन्दोविशेषमाश्रित्य नानाशाखानुसारेण सर्वे[१] पक्षाः संभाविताः, गायत्र्युष्णिगनुष्टुब्बृहती पङ्क्तिस्त्रिष्टुब्जगती चेति च्छन्दोविशेषास्तत्र प्रथमं पक्षमाह – **गायत्रं प्रउगं कुर्यादित्याहुस्तेजो वै ब्रह्मवर्चसं गायत्री तेजस्वी ब्रह्मवर्चसी भवतीति** इति । तेजः शरीरकान्ती राज्ञां सामर्थ्यं वा, ब्रह्मवर्चसं श्रुताध्ययनसंपत्तिः, तदुभयहेतुत्वाद् गायत्र्यास्तद्रूपत्वम् । अतो यजमानस्तदुभयवान् भवत्वित्यनेनाभिप्रायेण प्रउगशस्त्रं गायत्रीछन्दोविशिष्टं कुर्यात् । तस्य गायत्रस्य प्रउगस्य स्वरूपमाश्वलायनेन पूर्वषट्के पञ्चमाध्यायेऽभिहितम्–''वायुरग्रेगा यज्ञप्रीः (ऋखि ५.६.१-७; शांश्रौ ७.१०.९-१६) इति सप्तानां पुरोरुचां तस्यास्तस्या उपरिष्टात्

---

३२. प्रपञ्चितः रा.

१. सप्त रा.

**त्रैष्टुभं प्रउगं कुर्यादित्याहुर्वीर्यं वै त्रिष्टुब् वीर्यवान् भवतीति। जागतं प्रउगं कुर्यादित्याहुर्जागता वै पशवः पशुमान् भवतीति। तदु गायत्रमेव कुर्याद् ब्रह्म वै गायत्री ब्रह्मैतदहर्ब्रह्मणैव तद् ब्रह्म प्रतिपद्यते। तदु माधुच्छन्दसम् । मधु ह स्म वा ऋषिभ्यो मधुच्छन्दाश्छन्दति तन्मधुच्छन्दसो मधुच्छन्दस्त्वम् ।**

---

तृचं तृचं शंसेद् 'वायवा याहि दर्शत' (ऋ १.२.१) इति सप्त तृचाः'' (आश्रौ ५.१०.४-५) इति ।

द्वितीयादिपक्षानाह– **औष्णिहं प्रउगं कुर्यादित्याहुरायुर्वा उष्णिग् आयुष्मान् भवतीति । आनुष्टुभं प्रउगं कुर्यादित्याहुः क्षत्रं वा अनुष्टुप् क्षत्रस्याऽऽप्त्या इति । बार्हतं प्रउगं कुर्यादित्याहुः श्रीर्वै बृहती श्रीमान् भवतीति । पाङ्क्तं प्रउगं कुर्यादित्याहुरन्नं वै पङ्क्तिरन्नवान् भवतीति । त्रैष्टुभं प्रउगं कुर्यादित्याहुर्वीर्यं वै त्रिष्टुब् वीर्यवान् भवतीति । जागतं प्रउगं कुर्यादित्याहुर्जगता वै पशवः**[2] **पशुमान् भवतीति** इति। क्षत्रं बलम् । अन्यत् पूर्ववद् व्याख्येयम् ।

एवं नानाविधब्राह्मणसिद्धानि मतान्युपन्यस्य तेषु प्रथमं स्वकीयत्वेन स्वीकरोति–**तदु गायत्रमेव कुर्याद् ब्रह्म वै गायत्री ब्रह्मैतदहर्ब्रह्मणैव तद्ब्रह्म प्रतिपद्यते** इति।

तदु तेषां तु सप्तानां मध्ये यत्[3] प्रथमम् उपन्यस्तं गायत्रं तदेवास्मिन् महाव्रते कुर्यात्। गायत्र्या ब्रह्मत्वं पूर्वमेवोक्तम् (१.१) । अस्य चाह्नो ब्रह्मत्वं तत्प्राप्तिहेतुत्वाद् अवगन्तव्यम्। तद्गायत्रप्रउगरूपेण ब्रह्मणा तन्महाव्रतरूपं ब्रह्म प्राप्नोति।

दाशतय्यां[4] गायत्रीछन्दस्कानां बहूनां विद्यमानत्वात् तद्विशेषं दर्शयति- **तदु माधुच्छन्दसम्** इति। तदपि गायत्रीछन्दस्कं प्रउगं मधुच्छन्दोनाम्न ऋषेः सम्बन्धि द्रष्टव्यम् । तेनर्षिणा दृष्टं[5] 'वायवा याहि' (ऋ १.२.१.) इत्यादिकं यन्मन्त्रजातं तदित्यर्थः।

ऋषेर्नाम निर्वक्ति– **मधु ह स्म वा ऋषिभ्यो मधुच्छन्दाश्छन्दति तन्मधुच्छन्दसो मधुच्छन्दस्त्वम्** इति । योऽयं मधुच्छन्दोनामक[6] ऋषिः सोयऽमितरेभ्य ऋषिभ्यो मधु च्छन्दति मधुरं भोग्यं संपादयितुमिच्छति । ह स्म वा इति निपातत्रयसमूह ऐतिह्यार्थः । यस्माद् अयं मध्विच्छति[7]तस्माद् अस्य[7] तन्नाम

---

२. पशूनां जगत्याऽऽहृतत्वात् 'जगती हि तानाहरत्' (ऐब्रा ३.२५) इति हि ब्राह्मणम्।

३. **यत्तु** अ.

४. **दशतयीनां** रा.

५. **दृष्टं हि** रा.

६. °**न्दो नाम** रा.

७-७. **तस्मात् तस्य** रा.

**अथो अन्नं वै मधु सर्वं वै मधु सर्वे वै कामा मधु तद् यन्माधुच्छन्दसं शंसति सर्वेषां कामानामवरुद्ध्यै । सर्वान् कामान् अवरुन्द्धे य एवं वेद ।**

**तद्वैकाहिकं रूपसमृद्धं बहु वा एतस्मिन्नहनि किंच किंच वारणं क्रियते शान्त्या एव शान्तिर्वै प्रतिष्ठैकाहः शान्त्यामेव तत् प्रतिष्ठायामन्ततः**

---

सम्पन्नम्।

ऋषिसंबन्धेन शस्त्रं प्रशस्य फलसंबन्धेनापि प्रशंसति—**अथो अन्नं वै मधु सर्वं वै मधु सर्वे वै कामा मधु तद् यन्माधुच्छन्दसं शंसति सर्वेषां कामानामवरुद्ध्यै** इति। माक्षिकवाची[८] मधुशब्दस्तन्निष्ठं प्रियत्वं लक्षयति। अन्नस्य प्रियत्वं प्रसिद्धम्। तद्वद् वस्त्रादेः सर्वस्यापि भोग्यस्य प्रियत्वं प्रसिद्धम्। यस्मात् प्रियत्वेन सर्वेऽपि कामा मधुरूपास्तस्मात् कारणान्मधुत्वसामान्यान्माधुच्छन्दसं शंसतीति यदस्ति तत् सर्वकामप्राप्त्यै संपद्यते।

माधुच्छन्दसवेदनं प्रशंसति-**सर्वान् कामानवरुन्द्धे य एवं वेद** इति।

पुनः प्रकारान्तरेण शस्त्रं प्रशंसति — **तद्वैकाहिकं रूपसमृद्धं बहु वा एतस्मिन्नहनि किंच किंच वारणं क्रियते शान्त्या एव शान्तिर्वै प्रतिष्ठैकाहः शान्त्यामेव तत् प्रतिष्ठायामन्ततः प्रतितिष्ठन्ति** इति । तदु तदपि यथोक्तं गायत्रं प्रउगम् ऐकाहिकम् एकाहे प्रकृतिभूतेऽग्निष्टोमे निष्पन्नं तदेव विश्वजिद्-द्वारेणास्मिन् महाव्रते प्राप्तमन्तत[९] ऐकाहिकत्वाद् एतद् रूपसमृद्धम् । प्रकृतिरूपे ह्येकाहे कृत्स्नस्यानुष्ठेयस्य प्रत्यक्षवचनप्रापितत्वाद् अविस्मरणेन सर्वमनुष्ठातुं शक्यम् । सेयं रूपसमृद्धिः । न च किमनेनैकाहिकत्वेनेति[१०] शङ्कनीयम् । तस्यानिष्टशमनार्थत्वात् एतस्मिन् महाव्रताख्येऽहनि वारणं शिष्टैर्निवारणीयं वर्जनीयं किमपि बहुविधं दासीनृत्यबहुभूतमैथुनब्रह्मचारिपुंश्चलीसंप्रवादादिकं[११] (द्र. ऐआ. ५.१.५) क्रियतेऽतस्तस्य[१२] शान्त्यर्थमेव सरूपसमृद्धस्यैकाहिकस्य[१३] प्रउगशंसनम् । एकाहस्य तु सर्वविकृतिप्रतिष्ठापकत्वाच्छान्तिहेतुत्वम् उपपन्नम् । अतो यजमाना अप्यन्ततः संवत्सरसत्रस्यावसान[१४] उपान्त्येऽस्मिन्नहनि तत् तेन शस्त्रपाठेन प्रतिष्ठारूपायाम् अनिष्टशान्त्यामेव प्रतितिष्ठन्ति प्रतिष्ठिता भवन्ति ।

अस्य शस्त्रस्य प्रतिष्ठाहेतुत्ववेदनं तत्पूर्वकानुष्ठानं च प्रशंसति — **प्रतितिष्ठति य एवं वेद येषां चैवं विद्वान् एतद्धोता शंसति** इति । येषां

---

८. **मादक**° रा.

९. **प्राप्तम्। अत** रा.

१०. °**हिकवचनेनेति** रा.

११. **दासीवृत्तवदुमैथुन**° आन.

१२. °**स्य सर्वस्य** रा.

१३. **रूप**° रा.

१४. °**सानभागे** रा.

**प्रतितिष्ठन्ति। प्रतितिष्ठति य एवं वेद येषां चैवं विद्वान् एतद्धोता शंसति।**

।।इत्यैतरेयब्राह्मणारण्यकाण्डे प्रथमारण्यके प्रथमाध्याये तृतीयः खण्डः।।३।।

---

शस्त्रिणामर्थ एवम् उक्तप्रकारेण शस्त्रमहिमानं विद्वान् होतैतच्छस्त्रं[१५] शंसति तेऽपि सत्रिणः प्रतितिष्ठन्तीति द्रष्टव्यम् ।

**।। इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाश ऐतरेयब्राह्मणारण्यकभाष्ये प्रथमारण्यके प्रथमाध्याये तृतीयः खण्डः ।।३।।**

१५. °**होता तदेत**° रा.

# बौधायनश्रौतसूत्रम्

## [ भवस्वामिकृतविवरणसहितम् ]

संपादकः
विजयपालः

### आमुखम्

परःसहस्रैर्विपरीतझञ्झावातं सासह्यमानं वैदिककर्मकाण्डवाङ्मयमद्यापि स्वविशालग्रन्थराशिना सुसमृद्धं वर्त्तते । अद्यत्वेऽपि दक्षिणापथे स्पृहणीयश्रद्धया दर्शपूर्णमासादारभ्य आहीनयागं यज्ञा अनुष्ठीयन्ते। सहस्रशो ब्राह्मणा अद्यापि श्रौतवाङ्मयमहर्निशमभ्यस्यन्ति । तत्र श्रौतवाङ्मये बौधायनस्य महत्त्वविशेषो वर्त्तते प्राचीनतमत्त्वात् सुखावबोधत्वाच्च । प्राचीनानूचानैरप्यस्यैव प्राथम्यं प्रत्यपादि । तथा च भट्टभास्करः स्वकीयतैत्तिरीयसंहिताभाष्योपक्रमे बोधायनमेव प्रथमतः प्रणनाम–

प्रणम्य शिरसाचार्यान् बोधायनपुरस्सरान् ।
व्याख्यैषाध्वर्युवेदस्य यथाबुद्धि विधीयते ।। इति

सत्याषाढवैजयन्तीव्याख्याकृतो महादेवस्यापि कठिनी इदम्प्रथमतया बोधायननाम्न्येव पतति । तथाहि –

यत्राकरोत्सूत्रमतीवगौरवात् बोधायनाचार्यवरोऽर्थगुप्तये ।
तथा भरद्वाजमुनीश्वरस्तथाऽपस्तम्ब आचार्य इदं परं स्फुटम् ।। इति ।

सुप्रतिष्ठस्यास्य त्रिंशत्प्रश्नात्मकस्य बौधायनसूत्रस्य विवरणभाष्यवृत्ति-व्याख्याप्रयोगकृत्सु भवस्वामि-सायण-महादेव-दामोदर-रामस्वामि-गोपाल-वेङ्कटेश्वर-वासुदेव-द्वारकानाथ-सुदर्शनाचार्यप्रभृतीनां विंशत्यधिकसंख्याकानि नामानि प्रख्यायन्ते, तेषां च कृतयोंऽशतो हस्तलिखितमातृकासु समुपलभ्यन्ते । सम्पूर्णस्य ग्रन्थस्य विवृतिस्त्वेकापि न श्रूयते क्वचित् । एता हस्तलिखितमातृकाः खल्वपि कर्मकाण्डविदां विप्राणां पुस्तकवेष्टनेषु निबद्धाः प्रायशः प्रकाशं प्रतीक्षन्ते। एतासु व्याख्यासु भवस्वामिकृता विवरणाभिधा कृतिः प्राचीनतमा प्रतीयते । भवस्वामिनः प्राचीनतमः उल्लेखो भट्टभास्करमिश्रेण स्वकीये तैत्तिरीयसंहितायाः भाष्ये नामग्राहमकारि– 'वाक्यार्थैकपराण्यधीत्य च भवस्वाम्यादिभाष्याण्यतो

भाष्यं सर्वपथीनमेतदधुना सर्वीयमारभ्यते' इति । भट्टभास्करो दशम्यां शताब्द्यां स्व-भाष्यं रचयामासेत्यभियुक्ताः; अतो भवस्वामी नवमशताब्द्यां दक्षिणापथं सनाथ-याञ्चकारेति सम्भाव्यते । एकादशशताब्द्यां लब्धयशाः केशवस्वामी भव- स्वामिनमनुसरति, तथा हि स स्वकीये बौधायनश्रौतसूत्रप्रयोगसार उल्लिखति —'भवस्वामिमतानुसारिणा मया तूभयमप्यङ्गीकृत्य प्रयोगसारः क्रियते' इति । सुप्रख्यातः कारिकाकारो गोपालोऽपि स्वकीयं गोपालकारिकाख्यं ग्रन्थं भवस्वामि-विवरणमेवानुसृत्य रचयामासेति —'इति द्वैधोदिताः पक्षा भवस्वामिमतानुगाः' — इत्युल्लिख्य प्रकटयाञ्चकार । सायणाचार्योऽपि एनं विवरणकृतम् अभियुक्तपदेन स्मृत्वा समाद्रियते बौधायनश्रौतसूत्रभाष्ये । अतो वैदिकविद्वत्सम्मानभाक् विवरणकारो भवस्वामी बौधायनश्रौतसूत्रव्याख्यातृषु प्राचीनतमः, शोभनतमा चास्य कृतिः ।

विवरणस्य शैली संक्षिप्तवाक्यबहुला, सुप्राञ्जलभाषानिबद्धा, निगूढार्थप्राया, कर्मकाण्डरहस्योद्भेदिका, वैकल्पिकविधीनां तत्त्व निर्णायिका, सुव्यक्ताभिप्राया च वर्त्तते । सम्प्रत्युपलभ्यमानास्तु विवरणस्य हस्तलिखितमातृका दुश्शोधत्रुटिबहुला अशुद्धभ्रष्टपाठाकीर्णाश्च वर्त्तन्ते । इदं विवरणमादितश्चतुर्दशसु प्रश्नेषु अतिरात्र-एकादशिनी-सौत्रामणी-अप्तोर्यामयागेषु द्वैधकर्मान्तसूत्रयोश्च सुरक्षितमस्तीति कालन्दमहोदयः सूचयामास बौधायनश्रौतसूत्रामुखे १९०३ ख्रीष्टाब्दे । तस्य महाविदुषो महती मनःकामना आसीत् भवस्वामिविवरणस्य प्रकाशनस्य, परं न सा फलवती बभूव तस्य जीवनकाले । डा. सीताराम-सहगलशास्त्रिमहाभागेन कतिपयवर्षेभ्यः पूर्व बौधायनश्रौतसूत्रस्य प्रथमप्रश्ने भवस्वामिविवरणं समपादि, तस्य प्रकाशनं सायणभाष्येण सार्धं रामलाल-कपूरट्रस्टाख्यया बहालगढस्थया (जिला-सोनीपत, हरियाणा) संस्थया व्यधीयत । तदनन्तरमनयैव संस्थया बौधायनश्रौतसूत्रस्य द्वितीयप्रश्नो महादेवकृत सुबोधिनीवृत्त्या सहितः प्रकाशितः । ततोऽग्रेऽपि यावदुपलब्धसुबोधिनीवृत्तिसहितस्य बौधायनसूत्रस्य प्रकाशनस्य योजना आसीत् । गतवर्षे श्रीराधेश्यामशास्त्रिमहाभागस्य परमस्नेहसिक्तसन्तताग्रहमूरीकृत्य मया यथोपलब्धं भवस्वामिविवरणस्य सम्पादनकर्म इन्दिरागांधिराष्ट्रीयकलाकेन्द्रसाहाय्येन समारम्भि । श्रीराधेश्यामशास्त्रिमहोदयानां प्रयासेनैव पाण्डुलिपयः सङ्कलिताः । तत्रोपयुज्यमानानां पाण्डुलिपीनां विवरणमधस्तात् प्रस्तूयते —

(१)

**गोकर्णः (गो०)** I दर्शपूर्णमासादिसोमान्तम् (१-९ प्रश्नाः) । लिपिः । आकारः - २५ × ११ से. मी., पत्रसंख्या १३९, प्रतिपृष्ठं पङ्क्तयः । प्रतिपङ्क्ति १२-१४ शब्दाः । लेखः सुपठः प्रायः शुद्धः । प्रा

श्रीगणेशाय नमः । ब्राह्मणानां बहुत्त्वादेकैकस्यां शाखायां अपरिसमाप्तित्त्वादर्थस्य .....। प्रत्यध्यायं समाप्तिनिर्देशः । अन्ते – अत ऊर्ध्वं प्रकृतिवदेव प्रसिद्धम् । इति श्रीस्वामीविरचितः समाप्तोऽग्निष्टोमः ! संवत् १९७९ साल पौषसुरी १ रोज गुरुवार ।।

**गोकर्ण: (गो०)** II अग्निचयन-राजसूय-वाजपेय-इष्टिकल्पाः (१०–१३ प्रश्नाः)। नागरी लिपिः । आकारः ३५ × १३ से.मी. । पत्रसंख्या ५७ । प्रतिपृष्ठं ९ पङ्क्तयः । प्रतिपङ्क्ति १५ शब्दाः । लेखः सुपठः । पाठः शुद्धः । प्रारम्भे - श्रीगणेशाय नमः । अग्निचयनं । अग्नेरनारभ्याधीतत्वा-दनारभ्याधीतानां प्रकृत्यर्थत्वाद् दीक्षादिसम्बन्धात् । अन्ते - परस्परतः अन्यस्य वाग्निभिः । इति भवस्वामिकृते इष्टिकल्पे द्वादशोऽध्यायः ।।१२।। इति कल्पः समाप्तः। औपानुभाष्यं समाप्तः । ....संवत् १९३७ शके १८०२ नंदन-नामसंवत्सरे दक्षिणायने हेमन्त ऋतौ मार्गशीर्षे कृष्णपक्षे चतुर्थ्यां तिथौ इन्दु-वासरे प्रातःकाले श्रीगङ्गाकाशीविश्वेश्वरसन्निधौ समाप्तः ।

**गोकर्ण (गो०)** III भवस्वामिद्वैधविवरणम् (२०-२३ प्रश्नाः) । नागरी लिपिः । आकारः २२ × ११ से. मी. । पत्रसंख्या ११७ । प्रतिपृष्ठं १० पङ्क्तयः । प्रतिपङ्क्ति शब्दाः १२ । सुपठः शुद्धः लेखः । प्रारम्भे – उपवसथ इत्यादि द्वैधानां पूर्वनिरपेक्षत्वं विशेषणविशेषित्वं....। अन्ते – सर्वस्य वाचनिक-त्त्वादिति । १४ । इति भवस्वामिकृते चतुर्थस्य दशकस्य दशमोऽध्यायः ।।

(२)

**पाचवड (वैदिकसंशोधनमण्डलम्) (पा०)** I दर्शपूर्णमासादिसोमान्तः (१-९ प्रश्नाः) । नागरी लिपिः । आकारः – २२ × १० से. मी. । पत्रसंख्या १७१ । प्रतिपृष्ठं पङ्क्तयः १० । प्रतिपङ्क्ति शब्दाः १२ । लेखः सुपठः, प्रायः शुद्धः । प्रारम्भे – श्रीदुंढिराजाय नमः । श्री विश्वेश्वराय नमः । श्री गोपालं गुरुं भजे । ब्राह्मणा बहुत्वदेकैकस्यां.....। अन्ते-अत ऊर्ध्व प्रकृतिवदेव सिद्धं ।। इति श्रीभवस्वामिविरचितः समाप्तोऽग्निष्टोमः । शुभं भवतु । शके १७०५ वर्षे शोभकृतनामसम्वत्सरे फाल्गुणशध पञ्चम्यां समाप्तः ।।

**पाचवड (वै.सं.म.) (पा०)** II द्वैधसूत्रविवरणम् (२०-२३ प्रश्नाः) । नागरी लिपिः । आकारः -२२ × १० से. मी. । पत्रसंख्या १७६ । प्रतिपृष्ठं पङ्क्तयः ८ । प्रतिपङ्क्ति शब्दाः १२ । लेखः सुपठः, शुद्धः । प्रारम्भे – श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । उपवसथ इत्यादि द्वैधानां पूर्वनिरपेक्षत्त्वं विशेषेण...। अन्ते – सर्वस्य वाचनिकत्त्वादिति । इति भवस्वामिकृते द्वैधविवरणे चतुर्थस्य दशकस्य दशमोध्यायः । समाप्तिमगमत् । शुभमस्तु ।

**पाचवड (वै.सं.म.) (पा०)** III कर्मान्तिविवरणम् (२४-२६ प्रश्नाः) । नागरी लिपिः । आकारः २२ × १० से. मी. । पत्रसंख्या ७५ । प्रतिपृष्ठं

पङ्क्तयः ९ । प्रतिपङ्क्ति शब्दाः १२ । लेखः सुपठः, शुद्धः । प्रारम्भे – श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । पञ्चतयेन कल्पमवेक्षेतेत्यादिकर्मान्त इत्यन्वर्थकसंज्ञा कर्मणामन्त इति...। अन्ते– प्रतिपादितं यज्ञेन यज्ञमुपलक्षयतेत्यभ्यासः समाप्तितुष्टिमंगलार्थः । इति भवस्वामिकृते कर्मांतविवरणे तृतीयस्य कर्मान्तस्य विंशोध्यायः । समाप्तश्च मूलकल्पाद्वैधकर्मांताः ॥

**पाचवड (वै. सं. म.) (पा०)** IV अग्निकल्पः । नागरी लिपिः । आकारः ३४ x ११ से. मी. । पत्रसंख्या १२ + १८ । अनिश्चितम् ?

(३)

**वाई (प्राज्ञपाठशाला) (वा०)** दर्शपूर्णमासादि अग्निष्टोमान्तम् (१-९) । नागरी लिपिः । आकारः २२ x १८ से. मी. । पत्रसंख्या १२९ । प्रतिपृष्ठं पङ्क्तयः १४ । प्रतिपङ्क्ति शब्दाः १० । पाचवडस्यैव प्रतिलिपिमात्रम् ।

(४)

**मुद्रितः कोशः (मु०)** सीतारामसहगलसंपादितः, पाण्डुलिपिचतुष्टयाधारभूतः, रामलालकपूरट्रस्ट, बहालगढ, जि. सोनीपत(हरियाणा) द्वारा प्रकाशितः ।

(५)

**बडौदा (ओरियण्टल इन्स्टिट्यूट ४५१) (ब०)** I दर्शादिसोमान्तः (१-९ प्रश्नाः) । नागरी लिपिः । आकारः - ३० x ११ से. मी. । पत्रसंख्या ११३ । प्रतिपृष्ठं पङ्क्तयः ९ । प्रतिपङ्क्ति शब्दाः २० । सुपठः शुद्धः । प्रारम्भे – श्रीगणेशाय नमः । ब्राह्मणाणां बहुत्वादेकैकस्यां शाखायां .......। अन्ते —अत ऊर्ध्वं प्रकृतिवदेव प्रसिद्धम् । इति श्री भवस्वामिविरचितः समाप्तोग्निष्टोमः । श्री सांबसदाशिवार्पणमस्तु ।....शके १७६२ शार्वरीनामसंवत्सरे दक्षिणायने शरदृतौ आश्विने शुक्लपक्षे द्वादशां तिथौ गुरुवासरे इदं पुस्तकं समाप्तम् ।

**बडौदा (ओ. इ. ४५२) (ब०)** II अतिरात्र – एकाहान्तः (१२, १५-१८ प्रश्नाः) नागरी लिपिः । आकारः ३५ x ११ से. मी. । पत्रसंख्या ५३ । प्रतिपृष्ठं पङ्क्तयः ९ । प्रतिपङ्क्ति शब्दाः १५ । सुपठः शुद्धः । प्रारम्भे – श्रीगणेशाय नमः । ॐ । अतिरात्रिंकरिष्यनित्यादि ......। अन्ते – इत्यादिनैतत् क्रियते त्रयोपि कर्त्तव्या इति । एकाहे एकादशोध्यायः । शके १७६२ शार्वरीनाम सम्वत्सरे दक्षिणायने हेमंत ऋतौ पौषे मासे शुक्ल पक्षे द्वितीयां तिथौ भृगुवासरे तद्दिने इदं पुस्तकं समाप्तम् ।

**बडौदा (ओ. इ. ११३९५) (ब०)** III द्वैधसूत्रविवरणम् (२/१०–४ प्रश्नाः) । देवनागरी लिपिः । आकारः - ३० x ११ से. मी. । पत्रसंख्या १५६ । प्रतिपृष्ठं पङ्क्तयः १४ । प्रतिपङ्क्ति शब्दाः ८ । सुपठः, शुद्धः । प्रारम्भे– प्रत्यभिमर्शनं प्रत्यभिमर्शद्रव्यभेदानामात्मनोऽपि संस्थानभेदः । कालभेदा-

च्वेति । अन्ते – एवं सति यत्राप्युपपत्त्याभावा सा उक्तः तत्रापि न दोषः । सर्वस्य वाचनिकत्वादिति । इति भवस्वामिविरचितायां द्वैधवृत्तौ दशमोध्यायः समाप्तः । द्वैधवृत्तिः समाप्ता ।

**बडौदा (ओ. इ. २९-९-२१) (ब०)** IV द्वैधविवरणम् (२०-२२ प्रश्नाः) । देवनागरी लिपिः । आकारः ३३ × २१ से. मी. । पत्रसंख्या ४० । प्रतिपृष्ठं पङ्क्तयः ९ । प्रतिपङ्क्ति शब्दाः २२ । सुपठः, शुद्धः । प्रारम्भे – उपवसथ इत्यादि द्वैधानां पूर्वनिरपेक्षत्वं विशेष विशेषित्वं.... । अन्ते – दीक्षासमाप्तिः न काललक्षणात्ततश्च सोपि प्रतिषेधकाल एवेति न प्रतिहोम इति ।।२०।। इति भवस्वामिविरचितायां द्वैधवृत्तौ द्वितीयस्य दशकस्य दशमोऽध्यायः।। द्वितीयः प्रश्नः समाप्तः ।।

**बडौदा (ओ. इ. ४४२) (ब०)** V कर्मान्तिविवरणम् (२४-२६ प्रश्नाः) । नागरी लिपिः । आकारः ३३ × २१ से. मी. । पत्रसंख्या ३७ । प्रतिपृष्ठं पङ्क्तयः ९ । प्रतिपङ्क्ति शब्दाः २२ । सुपठः, शुद्धः । प्रारम्भे – श्रीगणेशाय नमः । पंचतयेन कल्पमवेक्षेतेत्यादिकर्मान्त इत्यन्वर्थसंज्ञा.... । अन्ते – प्रतिपादितं यज्ञे यज्ञमुपलक्षयतेत्यभ्यासः समाप्तितुष्टिमंगलार्थः। इति भवस्वामिकृते कर्मांतविवरणे तृतीयस्य कर्मांतस्य विंशोऽध्यायः । समाप्ताश्च मूलकल्पा द्वैधकर्मान्ताः ।।

(६)

**मद्रास** (GOML R. 3781) **(म०)** I दर्शपूर्णमासादिसोमान्तम् (१-९ प्रश्नाः) । नागरी लिपिः । आकारः - १६ × १८ से. मी. । पत्रसंख्या २०७ । प्रतिपृष्ठं पङ्क्तयः १८ । प्रतिपङ्क्ति शब्दाः १० । बहुधा दुष्पठः, अपूर्णः । प्रारम्भे– ब्राह्मणानां बहुत्वादेकैकस्यां ..... । अन्ते – हृदयशूलोद्वासने गच्छत्यत ऊर्ध्वं प्रकृतिवत् सिद्धम् । समाप्तोऽग्निष्टोमः ।। .....

**मद्रास** (GOML R. 5497) **(म०)** II प्रवर्ग्य-चयन-कर्मान्ताः । नागरी लिपिः । आकारः - १६ × १८ से. मी. । पत्रसंख्या ८१ । प्रतिपृष्ठं पङ्क्तयः २० । प्रतिपङ्क्ति शब्दाः १० । बहुशः त्रुटितः । सुपठः । अपूर्णः । प्रारम्भे – प्रवर्ग्यं संभरिष्यन्नित्यादि अनारभ्याधीतत्वात्.... । अन्ते – ओषधस्य निवायोकर .... । १९२९-३० ।

इत्थं प्रथमे प्रश्ने षण्णां पाण्डुलिपीनां (कोशानां) उपयोगो भविष्यति । ततोऽग्रे केवलानां चतुर्णामेव । एवं विनिवेद्य प्रस्तौमि स्थालीपुलाकन्यायेन भवस्वामिकृतं बौधायनसूत्रविवरणस्य प्रारम्भिकं स्वल्पांशं विद्वद्विमर्शार्थम् ।

# बौधायनश्रौतसूत्रम्

[भवस्वामिकृतविवरणसहितम्]

## प्रथमोऽध्यायः

**आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवति ।। स पुरस्तादेव हविरातञ्चनमुपकल्पयते ।। एकाहेन वा द्व्यहेन वा यथर्तु ।। अथ वै ब्राह्मणं भवति –** दध्नातनक्ति सेन्द्रत्वायाग्निहोत्रोच्छेषणमभ्यातनक्ति यज्ञस्य संतत्यै (तै. सं. २।५।३।५,६) **इति ।। चन्द्रमसं वाऽनिर्ज्ञाय सम्पूर्णं वा विज्ञाय ।। अग्नीनन्वादधाति त्रीणि काष्ठानि गार्हपत्येऽभ्यादधाति त्रीण्यन्वाहार्यपचने त्रीण्याहवनीये ।। परिसमूहन्ति ।। उपवसथस्य रूपं कुर्वन्ति ।। अथास्य व्रतोपेतस्य पर्णशाखामाच्छैति प्राङ्वोदङ् वा वाचंयमो यत्र वा वेत्स्यन्मन्यते ।। सा या प्राची वोदीची वा बहुपर्णा बहुशाखाप्रतिशुष्काग्रा भवति तामाच्छिनत्ति –** इषे त्वोर्जे त्वा **(तै. सं. १।१।१।१) इति ।। तया वत्सानपाकरोति –** वायव स्थोपायव स्थ **(तै. सं. १।१।१।१) इति ।। अथैषां मातृः प्रेरयति –** देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्मा मा व स्तेन ईशत माऽघशंसो रुद्रस्य हेतिः परि वो वृणक्तु **(तै. सं. १।१।१।१) इति ।।** ध्रुवा अस्मिन् गोपतौ स्यात बह्वीः **(तै. सं. १।१।१।१) इति यजमानमीक्षते ।। अथैतां शाखामग्रेणाहवनीयं पर्याहृत्य पूर्वया द्वारा प्रपाद्य जघनेन गार्हपत्यमग्निष्ठेऽनस्युत्तरार्धे वाग्न्यगारस्योद्गूहति –** यजमानस्य पशून् पाहि **(तै. सं. १।१।१।१) इति ।। इति नु यदि संनयति । यद्यु वै न संनयति बर्हिःप्रतिपदेव भवति ।।**

## भवस्वामिविवरणम्

ब्राह्मणानां बहुत्वादेकैकस्यां शाखायामपरिसमाप्तत्वादर्थस्य[१] च दुर्बोधत्वादसार्वत्रिकत्वाच्च[२] संहृत्य विवरणार्थं सुखं बुद्ध्वा कर्मसाङ्गमनुष्ठाय[३] फलं सर्वे प्राप्नुयुरिति फलकल्प आरब्ध आचार्येण । वाक्यसम्बन्धश्च गर्भाधानादिसंस्कारैः संस्कृतोऽधीत्य वेदान् न्यायतः कृतदार आहिताग्निरामावास्येन वेति चोदितस्य[४] कर्मणोऽधिकारी । तानि च कर्माणि नानाविधानि । तत्र दर्शपूर्णमासाग्निहोत्रज्योतिष्टोमप्रवर्ग्याण्यपूर्वाणि । तत्र दर्शपूर्णमासविकारा इष्टयोऽग्नीषोमीयश्च पशुः । ज्योतिष्टोमविकारा एकाहा द्वादशाहश्च[५] । अग्निहोत्रं न[६] प्रकृतिः । प्रकृतिर्नाम सर्वधर्माणामातिदेशिकं प्रवर्ग्याधानकुण्डपायिनामयनेषु[७] प्रवर्ग्यश्च न प्रकृतिः । दधिघर्मे धर्मातिदेशं[८] केचिदिच्छन्ति "परिश्रित्योभयतः शान्तिं कृत्वा" (बौ. श्रौ. २१/२२) इति । दर्शपूर्णमासज्योतिष्टोमौ प्रकृती एव । अग्नीषोमीयद्वादशाहसवत्सरादयः प्रकृतिविकृतयः । इष्टयः एकाहश्चोद्भिदादयो विकृतय एव । दर्विहोमादयो न प्रकृतयो न विकृतयः ।

आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवति । दर्शपूर्णमासारम्भो मन्त्रक्रमात् निरपेक्षत्वात् । आधानादीनां सांगानां समस्तविधानाभावादेतदपेक्षत्वाच्च । अनयोर्ज्ञानेन तेषां गतकल्पत्वात्[९] । पौर्णमासस्यादित्वेऽप्यमावास्यायाः[१०] प्रथमग्रहणं मन्त्रक्रमात् । दाक्षायणयज्ञादौ शाखाहरणाद्यारम्भस्य पौर्णमास्यामप्युपकारात् पौर्णमासीधर्मारम्भे क्वचिदप्यामावास्यस्यानुपकारात् असाधारण्यादादिपदार्थस्य[११] ।

अथातो दर्शपूर्णमासौ व्याख्यास्याम इत्यप्रतिज्ञातमारम्भादेव गम्यत इति अथेत्यधिकाराकरणं तयोरेवारम्भात् । तद्धितश्च कालप्रकृतेः 'तस्येदम्' (अष्टा. ४।३।१२०) इति वा 'भवार्थे' (अष्टा. ४।३।५३) वा विध्यपेक्षः । एवं सति य इष्ट्या पशुना सोमेनाग्रयणेन यक्ष्यमाणः सोऽमावास्यायां पौर्णमास्यां वा[१२] यजेतेत्यप्रसङ्गः । प्रयोजननिमित्ता संज्ञा इत्येतस्य व्याख्यापनम् । एवं च सत्याग्नेयादीनां प्राधान्यात् दर्शपूर्णमासाभ्यां स्वर्गकामफलसम्बन्धत्वान्निमित्तत्वे[१३] च ज्ञापिते सति निमित्ते नैमित्तिकेन भवितव्यम् इति यावज्जीविताप्युक्ता भवति। तेषां च परस्परानपेक्षाणामुत्पत्तौ भेदप्रसङ्गेऽपि दर्शपूर्णमासाभ्यामिति

---

१. '°समाप्ति°' कोशेषु ।
२. '°सार्वजन्यत्वा°' मु०, म० ।
३. 'कर्माण्यनुष्ठाय' म० ।
४. 'चोदितस्वकर्मणि' गो० ।
५. '°हाश्च' मु०, म० ।
६. 'च' म० ।
७. इतोऽग्रे 'च' अधिकः मु०।
८. 'धर्मा°' पा०, म० ।
९. 'ज्ञात°' पा०, वा० ।
१०. 'इह पौ°' मु०।
११. '°रणादा°' गो० । '°रणपदा°' मु०।
१२. 'पौर्णमास्यां वा' नास्ति पा०, मु० ।
१३. इतोऽग्रे 'अपि' अधिकः म० ।

द्विवचननिर्देशात् तत्कालसम्बद्धौ द्वौ समुदायौ न प्रत्येकमाग्नेयादयः । तयोश्च समुदितयोः फलसम्बन्धात् समुदितौ फलसाधनमिति[१४]गम्यते । उभयोरत्रैकवचन-निर्देशाद्दर्शपूर्णमासाभ्यामिति सिद्धे न[१५] समासकरणं भिन्नकालत्वात् । समुच्चयार्थो वा शब्दः वायुर्वात्वेति (तै. सं. १।७।७।२) यथा । सत्यपि समुच्चये प्रत्येकं यक्ष्यमाणसंबन्धो भिन्नकालविधानात् । अमावास्यायां वा पौर्णमासीं वातिपादयेदिति (तै. सं. २।२।२।१) लिङ्गान्नसंगतप्रसङ्गः[१६] । देवदत्तस्य यज्ञदत्तस्य च भुञ्जानस्य दधि कर्त्तव्यमिति तयोरुद्दिश्यमानत्वात् स्वकाल एव भुञ्जानयोरिति गम्यते । कर्तृविषयो वा विकल्पः । आमावास्येन यक्ष्यमाणो वा पौर्णमासेन यक्ष्यमाणो वेति कर्तृव्यापारस्य कादाचित्कत्वादुपपन्नो विकल्पः । एकेन सिध्यतीति चेत् दध्ना पयसा वा पात्नीवतमिति (बौ. श्रौ. २१।२३) यथा न क्वचिन्मुख्यानुकल्पदर्शनाद् दशाहमाशौचम् (मनु. ५।९) इत्यादौ पयसा भोजयेत् तक्रेण वेति च । ननु दध्ना पयसा वा पात्नीवतमिति समत्वेऽपि दृष्टः । तत एवासन्देहार्थमुभावुक्तौ बैल्वो वा खादिरो वेति यथा । हविषेति साधनेन साध्यसमुदायो लक्ष्यते आयुर्घृतमिति यथा । समुदाय-नामधेयत्वाद्दर्शपूर्णमासयोरुक्तयोश्च प्रयोगाभावात् निर्वर्त्यवक्तव्यम् अन्यथा-नर्थक्यं अविशेषणस्यां[१७] हविर्ग्रहणं विनापि सिद्धे हविर्मात्रेणाप्यशक्तौ कर्त्तव्या-वित्येतत् ख्यापयति[१८] । अतिपत्तौ च प्रधानमात्रस्य प्रायश्चित्तविधानादपि वाप्येकदेशे स्यादित्येष न्यायः संगृहीतो भवति । कर्तृनिर्देशादेकवचनं यक्ष्यमाण इत्यवश्यं कर्त्तव्यं हविष उपकल्पनस्यकरणत्वमाविज्ञापयति[१९] ।

यो यक्ष्यमाणः स पुरस्तादेवेति सिद्धे[२०] भवतिग्रहणस्यैतत्प्रयोजनम् — भवतेः सत्तार्थत्वात् असतश्च प्रसङ्गाभावात् सत एवाधिकारविशिष्ट-सत्तापरिग्रहार्थं वचनं न सन्मात्रस्याधिकारः अर्थिनः समर्थस्य शास्त्रेण वा पर्युदस्तस्येति । द्वयोराख्यातयोः परस्परेण सम्बन्धार्थं स इति ब्रुवन्नात्मीयेनैव सिध्यति कर्म न परकीयेनेति ज्ञापयति । ततश्च द्वादशाहे एकस्य द्रव्येणापि साधारणयागनिर्वृत्तौ[२१] सर्वेषामात्मीयत्वेन कर्त्तव्यम् इति ज्ञापितं भवति । साधनस्य साध्यात्पूर्वकालत्वे सिद्धे पुरस्ताद्ग्रहणं कर्मारम्भात्पूर्वस्मिन् काले यथा स्यात् । इतरथाऽरब्धे कर्मणि द्रव्यालाभे दोषः स्यात् । एतेनैव ज्ञापितत्वात् अन्यत्राधानादिषु पुरस्ताद्ग्रहणं न करोति । एव शब्दश्च न्यायादेव पूर्वकालत्वे सिद्धे यस्याप्रतिबन्धेन द्रव्यं सम्भवति तस्य तस्मिन्नपि काले ग्रहणे न दोष इति

१४. 'साधन' नास्ति म० म० ।
१५. 'असमा' पा० ब० ।
१६. '°संत°' पा०, वा०। '°संहत°' म०।
१७. 'विशेष°' मु० म०।
१८. 'व्यापारयति' म० ।
१९. '°त्वं मा विज्ञायीति' म० ।
२०. 'सिद्धे भवति' नास्ति मु० ।
२१. '°योग°' गो० ।

ज्ञापनार्थम् । यत्र क्वचित्[२२] पुरस्ताद्ग्रहणेन ज्ञापने सिद्धे इह वचनं प्रयत्नार्थं, न यतः कुतश्चित्तस्मिन् काले उपादेयं शुद्धिकामत्वाद्देवानामिति । हविरातञ्चनग्रहणं प्रदर्शनार्थं सर्वद्रव्याणां पुरोडाशादीनामनेनोपलक्षणादेकाहादीनां विशेषविवक्षया सहसोत्पादयितुमशक्यत्वात् प्रदर्शनार्थम् । उभाभ्यां यक्ष्यमाण उपकल्पयत इति वचनाद्दधिग्रहणाल्लाघवेन सामान्यवचनं तदभावेऽन्यस्यापि उपकल्पनार्थं पुनस्तस्यापि नाशशङ्कायां च । उपकल्पयत इति चौरादिकात् व्यन्ताद्धेतुमणिच्[२३] कर्त्रभिप्राये क्रियाफले इत्यात्मनेपदमुपकल्पयन्ति कर्मकरा-स्तानुपकल्पयते यजमान इति भौवादिकाद्वा क्लृपेस्तथैवात्मनेपदम् । भृत्यैरपि[२४] कारयन्[२५] करोत्येव यथाभक्तं ददातीति[२५] ।

यथर्त्वित्येव सिद्धे यावताह्ना विना न भवति तावतः प्रदर्शनार्थं विप्रकर्षस्य । एवं च सति प्राजापत्यानामङ्गानि यावता विप्रकर्षेण विना न सम्भवति तावदेव विप्रकृष्टकालानीति । यथर्त्विति सर्वत्रायमेव विकल्पो मा भूद् व्यवस्थितो यथा स्यात् ग्रीष्मे एकाहेन हेमन्ते द्व्यहेनेति[२६] । एको वाशब्दो विकल्पार्थः द्वितीयः अनियमार्थः[२७] । यथर्त्वेकाहेन द्व्यहेन वेत्युक्ते अत्रैव द्व्या-श्रयविकल्पः स्यात् । द्वितीये पुनर्वाशब्दे सति[२८] अयमपि नियमो नास्ति यथा-सम्भवमासन्नकाले उपकल्पनं कर्त्तव्यं दृष्टार्थत्वादातञ्चनस्येति । उभयोः प्रकृतत्वेपि सन्नयत इति न वक्तव्यं प्रदर्शनार्थं यथासम्भवं सर्वद्रव्याणा-मित्युक्तत्वात्[२९] ।

अथ वै भवतीत्यवचनेऽपि ब्राह्मणत्वेऽवगते, अन्यत्राथ[३०] वै भवतीत्युक्ते ब्राह्मणं द्रष्टव्यमिति यथाथ वै भवत्यष्टावत्तः स्विष्टकृद्द्वादशावत्तेडा (बौ. श्रौ. ६।११।१४) इत्यादौ । ब्राह्मणोक्तानां यत्पूतीकैः (तै. सं. २।५।३।५) इत्या-दीनां दध्नोऽभावे सदृशद्रव्योत्पादनार्थम् । एवं च सति तस्मिन्नविद्यमाने एतेषा-मेकेनातञ्च्यादिति, तेषामप्यभावे सामान्यवचनेनान्यस्योपसङ्ग्रहः । दध्नातनक्ती-ति[३१] दधिनियमार्थम् । अग्निहोत्रोच्छेषणोपादानं ब्राह्मणवाक्ये सम्बन्धत्वात् । यज्ञस्य सन्तत्या इत्यर्थवादत्वात् सायन्तनमिति गम्यते । तस्मिन् काले अविस्मरणार्थं च यथा दध्ना तथैवेत्यपरः । स यदि अग्निहोत्रोच्छेषणात् (बौ. श्रौ. २४।२३।९) इत्याद्यप्रमादार्थमेव नह्युभयार्थम् । अग्निहोत्रं प्रधानकर्मत्वा-

२२. 'क्वचित्' नास्ति गो० । 'तत्र क्वचित्' मु० । 'यः क्वचित्' म० ।
२३. '°णिच्च' गो० । '°तिच' अन्यत्र ।
२४. 'वाच्येन हि' गो०। 'वाक्येन हि' मु०, म० । इतोऽनन्तरं 'भृत्यैदपि कारयन्' मु० ।
२५. 'तातैव' मु० ।
२६. 'यथा...नेति' नास्ति मु० ।
२७. 'द्वि...र्थः' नास्ति म०।
२८. 'सति' नास्ति गो०, पा०, ब० ।
२९. 'सर्वत्रद्र°' गो० । 'द्रव्य°' म० ।
३०. 'अन्यत्र' नास्ति गो० ।
३१. 'इति' नास्ति गो०, पा०, ब०।

न्नैव गुणार्थमावर्त्तितुमर्हति । आवर्त्यमानमप्यग्निहोत्रमेव न स्यादतत्कालत्वात् ।

चन्द्रमसं वानिर्ज्ञायेति अनिर्गतं ज्ञात्वा नास्त्यद्येति बुद्ध्वा सम्पूर्णं वा विज्ञाय सम्पूर्णो भविष्यतीति ज्ञात्वा शास्त्रादन्यतो वेति क्त्वाप्रत्ययोपपत्तिः । वाशब्दाभ्यां दृश्यमानेऽप्यपूर्णेऽपीति ज्ञापयति । दर्शनापूर्णत्वयोः सर्वतिथिषु भावात् सर्वत्र प्रसङ्ग इति चेन्न अमावास्यापौर्णमास्योरेव विधानात् तत्रैव द्वैविध्यं न सर्वत्र प्रसङ्गः । कथं तयोर्विधानम्? आमावास्येन वेत्यत्रोक्तं कालनिमित्ता संज्ञेति कुतोऽन्यत्र प्रसङ्गः? ब्राह्मणे चोच्यते – यदाग्नेयोऽष्टाकपालः (तै. सं. २।६।३।३) इत्येवमादि, तस्मात्सदृशीनां रात्रीणाममावास्यायां पौर्णमास्यां च देवा इज्यन्ते (तै. सं. २।५।६।६)। पौर्णमास्यां पौर्णमास्या यजेत अमावास्याया-ममावास्यया यजेत (द्र. आप. यज्ञपरि. २।२०, १९) इति मन्त्रलिङ्गं पञ्चदशीं ये प्रविष्टाः (बौ. श्रौ. २०।१) इति छन्दसा ब्राह्मणेन (बौ. श्रौ. २४।१।१) इत्यभ्युपगमात् । प्रातरग्निहोत्रं हुत्वा इडा देवहूः (तै. सं. ३।३।२।१) इति जपित्वा देवा गातुविदः (तै. ब्रा. ३।७।४।१) इति च अग्नीन्पुनर्विहृत्य तूष्णी-मग्नीनन्वादधाति यो वै दधाति[३२] यो वै देवताः पूर्वः परिगृह्णाति (तै. सं. १।६।७।१) इति वचनात् अग्निहोत्रानन्तरमेवेति गम्यते । आचार्याभिप्रायश्च पुरा प्रातरग्निहोत्रात् पिंख्यानुपसादयेत् (बौ. श्रौ. २४।२०।७) इति वचनात् ।

त्रीणि काष्ठानीत्येवारब्धव्ये अग्नीनन्वादधातीति एतस्य कर्मणः संज्ञात्वख्यापनार्थम् । तच्चाभ्युदितमग्न्यन्वाधानमित्येवमादिषु संव्यवहारार्थम् । त्रीणि काष्ठानि गार्हपत्येऽभ्यादधाति तूष्णीमिति गम्यते मंत्रावचनात्, सूत्र-मौपमन्यवीपुत्रस्य (बौ. श्रौ. २०।१) इति भेदेन पक्षान्तरोपन्यासात् । केचिद् द्वैधकर्मान्तौपानुवाक्योक्तविधयो मूलकल्पप्रकरणोक्तैर्विधिभिर्विकल्प्यन्त इति ब्रुवते। अपरे विशेषोक्ता[३३] विशेषोक्तैर्विकल्प्यन्ते अविशेषोक्तैर्विशेषोक्ता[३४] अनुक्ताश्च शेषत्वेन सम्बध्यन्त इति । विशेषोक्तास्तावदिह शाखाच्छेदेन एको मन्त्रो द्वैधे (द्र. बौ. श्रौ. २०।१) पुरस्तात् प्रत्यञ्चमिति[३५] । अविशेषोक्ता-स्तावदग्न्यन्वाधानादयः अग्नीनन्वादधातीति इहोक्तम् । अङ्गुष्ठपर्वमात्राणि दैवतानि कृतानि (बौ. श्रौ. २४।२८।९) इत्यादि[३६] तत्र विशेषः। पूर्वार्धादव-दायेति (बौ. श्रौ. १।१४।१४) इहोक्तम् । व्यतिषज्यैवाङ्गुलीरवद्येदङ्गुष्ठप-र्वमात्राणि दैवतान्यवदानानि (बौ. श्रौ. २४।२८।८-९) इति तत्र । एवं प्रस्तरवेदिखननादिषु अनुक्तानामत्याक्रम्याश्राव्याह – समिधो यजेति (बौ. श्रौ. १। १६) इतीहोक्तमभिक्रामं जुहोति (बौ. श्रौ. २०।१३) इति तत्रोक्तम् ।

---

३२. 'यो वै दधाति' मु० मात्रे ।
३३. 'विशेषोक्ता' मु० मात्रे ।
३४. 'अविशेषोक्ता' सार्वत्रिकः पाठः, मु० विहाय ।
३५. 'विशेषो...मिति' मु० मात्रे ।
३६. 'उपस्थंकृत्वेत्यादि' कोशेषु, मु०विहाय।

सर्वेणाभिक्रामेत् (बौ. श्रौ. २०।१३) इत्यादिब्राह्मणोक्ता इहानुक्तास्तेऽप्युपसंग्राह्याश्छन्दसा ब्राह्मणेन (बौ. श्रौ.२४।१।१) इति वचनात् । यथोपवेषचर्मदयोलिङ्गादिना तयोर्विशेषनिश्चयः।

अग्न्यन्वाधानं याजमानमिति केचित् याजमाने समाम्नानात् । उपकल्पयते स इति प्रकृत्यान्वादधातीतिवचनात् स एवान्वाधत्ते इति गम्यते । योऽग्नीनन्वाधाय व्रतमुपैतीति व्रतेन समानकर्तृकत्वाच्च । व्रतं च निःसन्दिग्धं याजमानम् । आध्वर्यवमित्यन्ये इह समाम्नानात् । अथोपवसथीयेऽहन् (बौ. श्रौ. ३।१५।१) इत्यत्र चानाम्नानात्[३७] परस्मैपदात् ममाग्ने वर्चो विहवेषु (तै. सं. ४।७।१४।१) अस्त्वित्यध्वर्युरादधातीति शाखान्तरे दर्शनात् (द्र. का. श्रौ. २।१।२-३) । वेदिं विमायाग्नीनन्वादधातीति वेदिविमानादिसमानकर्तृकत्ववचनाच्चान्यतरस्मिन्नितरलिङ्गानुगमः कर्त्तव्यः । आचार्यस्योभयलिङ्गदर्शनादन्यतरानुगमे गौणत्वप्रसङ्गाद्विकल्पोऽभिप्रेत इति गम्यते ।

परिसमूहनं परितो जलसंयोगः । उपवसथस्य रूपमुपलेपनं पुष्पोपहारः कर्त्तव्यः । यमनियमेषु प्रयत्नः कर्त्तव्यः । अत्रैव परिसमूहनस्यान्तर्भावेपि पृथग्ग्रहणं परिसमूहनस्योपसमाहितेऽग्नौ अन्यत्रापि परिसमूहनपर्युक्षणपरिस्तरणनियमख्यापनार्थम् । उपवसथरूपापरिज्ञानाद्वा परिसमूहनाद्युपवसथरूपमिति । अथाश्रितस्य व्रतोपेतस्येति नोक्तमुभयथा दर्शनाद् व्रतोपायनीयमशित्वेतीह प्राप्नोति तस्य ब्राह्मणं प्रतिपाद्याश्नीयात् (बौ. श्रौ. २४।२१।१३) इति प्रस्तुत्याग्न्यान्वाधानवचनात्प्राप्नोति । नासन्द्यां शयीत (बौ. श्रौ. २४।२१।१६) इति वचनं न व्यवधायकमिति [३८]आरम्भे सङ्कल्पयितव्यं व्रतमिति तथान्यत्राप्युक्तमशनमग्न्यन्वाधानं व्रतोपायनमिति ।

अथ शब्दः पूर्वेषां व्यवच्छेदार्थः । तच्चैतदूर्ध्वं सन्नयतः । असंनयतो बर्हिः प्रतिपदेवेति विभागार्थम् । तथा सत्यग्न्यन्वाधानमुभयत्र सिद्धं भवति आतञ्चनं चास्य न भवति अर्थबलीयस्त्वात् । अस्येतिभेदनिर्देशादत ऊर्ध्वमाध्वर्यवमेवेति[३९] ज्ञापयति । व्रतोपेतस्य व्रतोपायनमव्रतनिवृत्तिसङ्कल्पो यस्य कृतपयस्वतीसमिदाधानस्येत्यर्थः । आभिमुख्येन पर्णशाखामाच्छैति गच्छति आप्तुं वा । आकारः प्रमादपाठ इति केचित् । आभिमुख्यार्थत्वादाच्छैतीत्याप्त्यर्थत्वादाभिमुख्येनाप्तुं गच्छतीत्यर्थः । बर्हिराच्छैतीत्यादिषुचोभयं[४०] विवक्षितम् । मर्यादार्थो वा, आ शाखाया गन्तव्यमिति। अर्थप्राप्तमिति छेदने दूरत्वेऽपि न प्रतिनिधिरिति । प्राङ्वोदङ्वेति वाशब्दद्वयमेकेन सिद्धे तुल्यविकल्पार्थम् । यत्र वेत्स्यन्नित्यनेनैव सिद्धे प्रागादिग्रहणं तदसम्भवेऽपि विकल्पार्थम् । अन्यत्र

---

३७. 'इत्यात्राम्नानात्' मु० ।
३८. 'विद्या°' पा०, वा० ।
३९. 'अस्येति चामेद°' मु०, म० ।
४०. 'नोमयं' गो०, मु० ।

लभमानोऽपि ईषत्प्राचीमुदीचीं वा गत्वा यथार्थं गच्छेदित्येवमर्थं च । तथाह –त्रीन् वा चतुरो वा प्राञ्चः (बौ. श्रौ. २०।२) इति । विदिर्लभार्थो मन्यतेः पृथगुपन्यासात् ।

प्राचीमुदीचीं वा वृक्षस्य प्रागग्रतो वा वाशब्दात् प्रागुदीची वेति ब्राह्मणे विस्पष्टमुक्तत्वात् (तै. ब्रा. ३।२।१।३) गम्यत इति अनयोरर्थवादेनाभेद-संस्तुतत्वात् तदभावाशंकानिवृत्त्यर्थम् । वा शब्दात्तयोरेवोपन्यासः । शम्युप-सङ्ग्रहार्थो वा वा शब्दः शाखान्तरे (द्र. का. श्रौ. ४।२।१) समाम्नातत्वात् । इहासमाम्नातमिति चेत् असिदग्रहणेन प्रदर्शितत्वात् न दोषः । बहुपर्णादिग्रहणं प्राचीनिन्दितापर्णादिनिवृत्त्यर्थम् । इषे त्वोर्जेत्वेतिच्छेदने विनियुक्तत्वात्प्रकाश-कत्वाच्च मन्त्राणामन्यथाऽसामर्थ्यात् । छिनद्मीति केचिदध्याहरन्ति (का. श्रौ. ४।२।२) तदयुक्तं पाठसामर्थ्याद्विनाशब्देन स्मर्त्तव्यम् । इमां प्राचीमुदीचीम् (तै. ब्रा. ३।७।४।८) इतिलिङ्गात्[४१] प्रागुदीच्यपि पक्षे[४२] प्रयोक्तव्यम् । विभज्य सर्वत्रेत्यपरे । वत्सानितिसम्भवापेक्ष एकशेषः । वायवस्थेत्यन्यायनिगदत्वादनूहः । प्रेरणं पृथक्करणम् । यजमानेक्षणं मनसा स्मरणं परोक्षेऽपीष्टत्वाच्चक्षुर्व्यापारे हि परोक्षनिवृत्तिः स्यात् । तत्र नित्यवत्पाठो[४३] बाध्येत । पूर्वपाठस्य प्रयोजनं केचित् प्राहुः मन्त्रे[४४] गवां प्राधान्यात् यजमानस्यासंस्पर्शनाद् गोपताविति शब्देन ऋषभ एवोच्यते । तत्र तासां ध्रुवत्वशासने एकमन्त्रताप्यस्तीति ।

शाखामित्येव सिद्धे एतामिति न पर्णशाखैव, शाखामात्रमिति । तत्र शाखान्तरे पठितं शम्याद्यस्तीति बोधयति । अग्रेणाहवनीयं पर्याहृत्य पूर्वया द्वारा प्रपाद्येति गार्हपत्यस्यैव शाला नेतरयोरिति,इतरस्याग्रेणाहवनीयागारमिति ब्रूयात् । अग्निष्ठे शकट इति वा शब्दाभावादेष मुख्यः कल्पः । उत्तरार्द्धे वा शालाया इत्यनुकल्पः । तथा च वक्ष्यति यद्यु वै नानो भवति (बौ. श्रौ. १।५।६) इति । उद्गूहतीत्युभयार्थः, न पर्णशाखार्थः एवेति । इति नु यदि संनयति, पाहीत्यत्रेति नास्ति क्वचिद्विना प्रयोगदर्शनात् उतेमनंनमुः (बौ. श्रौ. ७।४।३) इत्यथवो-भाभ्यां सम्बध्यते, एवं संनयत इत्यर्थः । पूर्वेणैव वा सम्बन्धः । नु शब्द एव-मित्यस्मिन्नर्थे । विध्यन्तरेऽपि दुग्धं लभमानस्येति मन्त्रनिवृत्त्यर्थम्, अर्थाभावे मन्त्रनिवृत्तिरिति[४५] । एतदेव ज्ञापयति अन्यत्रार्थाभावे निवृत्तिरिति । प्रयाजा-नुयाजाभावे जौहवाज्यादिनिवृत्तिः ख्यापिता भवति । असंनयतो बर्हिरारम्भ एव लवनं[४६] भवति । अयेत्यारभ्या एतस्मात् संनयतः व्रतोपायनानन्तरं बर्हिः

४१. 'लिङ्गात्' मु० ।
४२. 'प्रागुदीचीग्रहणपक्षे' गो०, ब० ।
४३. 'नित्यवत् आम्नातं' मु०, म० ।
४४. 'मन्त्रेण' मु०, म० ।
४५. '°भावे त्रा नि°' गो० ।
'°भावे मा नि°' मु० ।
४६. 'लवनं' नास्ति मु०, म० ।

प्रतिपत् । आतञ्चनाग्न्यन्वाधानयोर्यथोक्तम् ।

**।। प्रथमोऽध्यायः ।।**

## द्वितीयोऽध्यायः

**अथ जघनेन गार्हपत्यं तिष्ठन्नसिदं वाश्वपर्शुं वादत्ते** – देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे **(तै. ब्रा. ३।२।२।१) इति ।। आदायाभिमन्त्रयते** – यज्ञस्य घोषदसि **(तै. सं. १।१।२।१) इति ।। गार्हपत्ये प्रतितपति**– प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः **(तै. सं. १।१।२।१) इति त्रिः ।। अथाहवनीयमभिप्रैति** – प्रेयमगाद्धिषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा । त आवहन्ति कवयः पुरस्ताद् देवेभ्यो जुष्टम् **(तै. सं. १।१।२।१) इति ।।** इह बर्हिरासदे **(तै. सं. १।१।२।१) इति वेदिं प्रत्यवेक्षते ।। अथ तां दिशमेति यत्र बर्हिर्वेत्स्यन् मन्यते ।। दर्भस्तम्बं परिगृह्णाति यावन्तमलं प्रस्तराय मन्यते** – देवानां परिषूतमसि **(तै. सं. १।१।२।१) इति ।। अथैनमूर्ध्वमुन्मार्ष्टि** – वर्षवृद्धमसि **(तै. सं. १।१।२।१) इति ।। असिदेनोपयच्छति** – देवबर्हिर्मा त्वान्वङ् मा तिर्यक् पर्व ते राध्यासम् **(तै. सं. १।१।२।१) इति ।। आच्छिनत्ति – आच्छेत्ता ते मा रिषम् (तै. सं. १।१।२।१) इति ।। आच्छेदनान्यभिमृशति** – देवबर्हिः शतवल्शं विरोह **(तै. सं. १।१।२।१) इति ।।** सहस्रवल्शा वि वयं रुहेम **(तै. सं. १।१।२।२) इत्यात्मानं प्रत्यभिमृशते ।। सर्वश एवैनं स्तम्बं लुनोति ।। कृत्वा प्रस्तरं निदधाति** – पृथिव्याः सम्पृचः पाहि **(तै. सं. १।१।२।२) इति ।। तूष्णीमत ऊर्ध्वमयुजो मुष्टीन् लुनोति ।। त्रीन् वा पञ्च वा सप्त वा नव वैकादश वा यावतो वालं मन्यते ।। अथ त्रिरन्वाहितं शुल्बं कृत्वापसलैरावेष्टयति** – अदित्यै रास्नासि **(तै. सं. १।१।२।२) इति ।। तदुदीचीनाग्रं निधाय । तस्मिन् प्रस्तरमभि-सम्भरति** – सुसंभृता त्वा सम्भरामि **(तै. सं. १।१।२।२) इति ।। संनह्यति** – इन्द्राण्यै संनहनम् **(तै. सं. १।१।२।२) इति ।। ग्रन्थिं करोति**– पूषा ते ग्रन्थिं ग्रथ्नातु **(तै. सं. १।१।२।२) इति ।।** स ते

माऽऽस्थात् (तै. सं. १।१।२।२) **इति पश्चात्प्राञ्चमुपगूहति ।। अथैनदुद्यच्छते** – इन्द्रस्य त्वा बाहुभ्यामुद्यच्छे (**तै. सं. १।१।२।२**) **इति ।। शीर्षन्नधिनिधत्ते**–बृहस्पतेर्मूर्ध्ना हरामि (**तै. सं. १।१।२।२**) **इति ।। ऐति** – उर्वन्तरिक्षमन्विहि (**तै. सं. १।१।२।२**) **इति ।। एत्योत्तरेण गार्हपत्यमनधः सादयति** – देवंगममसि (**तै. सं. १।१।२।२**) **इति ।। तदुपरीव निदधाति यत्र गुप्तं मन्यते ।। तूष्णीं परिभोजनीयानि लुनोति ।। सकृदाच्छिन्नं पितृभ्य आच्छिनत्ति ।।**

**अथ तथैव त्रिरन्वाहितं शुल्बं कृत्वैकविंशतिदारुमिध्मं संनह्यति**– यत्कृष्णो रूपं कृत्वा प्राविशस्त्वं वनस्पतीन् ततस्त्वामेकविंशतिधा संभरामि सुसम्भृता (**तै. ब्रा. ३।७।४।८**) **इति ।। वेदं करोति वत्सज्ञुं पशुकामस्य मूतकार्यमन्नाद्यकामस्य त्रिवृतं तेजस्कामस्योर्ध्वाग्रं स्वर्गकामस्य ।। वेदिं करोति प्रागुत्तरात्परिग्राहात् ।। अथापराह्णे पिण्डपितृयज्ञेन चरति ।।**

### भवस्वामिविवरणम्

अथेति शाखानिधानानन्तर्यार्थः सन्नयतः असन्नयतो व्रतानन्तर्यार्थः ।। असिदं वाश्वपर्शुं वेति वाशब्दौ समानविकल्पार्थौ शाखान्तराम्नानात्[१] मान वीहि पर्शुरिति स्वशाखाम्नानाच्चासिदस्य समानधर्मत्वं न स्यादिति तन्निवृत्त्यर्थम् । एतदेव ज्ञापयति शाखान्तरोक्तविधिसंग्रहोऽस्तीति । परिग्रहो दर्भस्तम्बस्यासिदादिना परिलेखनम् । त्रिः कर्मेति (बौ. श्रौ. २०।२) दर्शनात् मनसा परिग्रहेऽपि एतन्न स्यात् इह सकृदेव मन्त्रः कर्म च । यावन्तमलमिति प्रस्तरपरिमाणविकल्पार्थम्[२] । छेदनादिषूपस्पर्शनं धर्मशास्त्रादिति केचित् । अन्ये तुषनिरसनादिषु विधानादन्यत्रानियम इति । अपरे क्वचिद्विधानं वैदिकप्रायश्चित्तार्थं उपस्पर्शनं तु नित्यमेवेति[३] । अपरे यत्र विधानं तत्र नित्यमेवेति । एतस्मादेव लिङ्गात् अन्यत्र विकल्प इति ज्ञापकं च । शस्त्रकामे[४] आत्मानं प्रत्यवमृश्याथोदकं स्पृशेदिति आचार्यदर्शनमिति ब्रुवन् शालीकेर्नास्तीति वचनम् । आच्छेदनाभिमर्शनं सकृदाच्छिन्नानामिति केचित् । अनन्तरं सर्वश एवैनं स्तम्बं लुनोतीति वचनात् । अन्ये सर्वस्तम्बं छित्त्वेति आशासनस्याविशेषात् लुनोतिः

१. 'माग्नी शाखान्तरा' पा०, वा० । अन्यत्र नास्ति ।
२. 'प्रस्तर वि°' गो०, मु०, ब०, म०।
३. 'तु नित्य°' मु०, म० । 'तुषादिषु नित्य°' अन्यत्र।
४. 'वास्तुहोमे' मु०, म०।

स्वादिषु द्रष्टव्यः । कृत्वेत्यसन्देहार्थं बद्ध्वेत्यर्थः करोतेरनेकार्थत्वात् ।

तूष्णींशब्दस्य वागिन्द्रियव्यापारनिवृत्तिविषयत्वात् मन्त्रमात्रं निवर्तते । परिग्रहाद्यावृतः सर्वाः परिगृह्यन्ते । अयं चाभिप्रायः आधाने तूष्णीमग्निहोत्रे सर्वावृद्वचनात् । अन्ये तूष्णींग्रहणादावृतोऽपि निवृत्तिमिच्छन्ति । अत्र न शब्दार्थो न च लिङ्गं दृश्यते । अयुज इत्येतस्य विशेषणं त्रीन्वेत्यादि । अत ऊर्ध्वमिति प्रस्तरनिवृत्त्यर्थम् । सर्वत्र वावचनं पूर्वपूर्वापर्याप्तौ उत्तरोत्तरपरिग्रहार्थम् । यावतो वेत्येतेषामन्यतरपरिग्रहे वाशब्दः समर्थितः स्यात् । तस्मात्सादितव्यवशादेतैरपर्याप्तत्वे[५] उपर्युपरि संग्रहार्थम् । पूर्वं प्रदक्षिणं कृत्वा पश्चादपसव्यं मन्त्रेणावेष्टयति । अन्ये मन्त्रो निधानार्थम् इति तन्न सम्यक् तच्छब्देन व्यवायात् अदित्यै रास्नासीत्युदीचीनाग्रं निधायेत्येवं सिध्यति । तस्मिन्निति शुल्बस्याधिकरणत्वनिर्देशात् प्रस्तरं पूर्वं सम्भरतीति गम्यते । पाठक्रमाच्च संग्रहणात्समश्चैकीभावार्थत्वात् क्रमाच्चोपरि मुष्टिरिति गम्यते । मन्त्रविपर्यासः पाठक्रमादर्थक्रमस्य बलीयस्त्वादग्निहोत्रे दोहनहोमवत् तूष्णीं परिभोजनीयानीति यद्यपीहोक्तं तथापि लवनकाल एव द्रष्टव्यं न तु पुनर्निधाय[६] गत्वा । पुनस्तूष्णींग्रहणस्य प्रयोजनं पूर्वेषां याजुषपक्षेऽपि एषां तूष्णीमेवेति[७] । अन्ये इहावृन्निवृत्त्यर्थमिति । ततश्च पूर्वेषां तूष्णीं पक्षेऽव्यावृन्निवर्तते ।

अथ तथैवेति । अथ शब्दः पौर्णमास्यां बर्हिर्निधानानन्तर्यार्थः । तथैवेति सिद्धे त्रिरन्वाहितग्रहणं मन्त्रनिवृत्त्यर्थम् । एकविंशतिग्रहणं नित्यत्वात्सम्भरणस्य प्रकारान्तराभावाद् दाहप्रकारार्थो[८]वानित्यापरिमितपक्षे मन्त्रनिवृत्तिरसामर्थ्यादितरस्मिन् पक्षे[९] कृतार्थत्वात् । नैमित्तिकेषु त्रींस्तृचाननुब्रूयादित्येवमादिषु काम्यनैमित्तिकानां नित्यविकारादूहः । अपरिमितपक्षे पदलोपः । मन्त्रनिवृत्तौ च प्रकृतिवद्भावादूहसामर्थ्यादूहे च दोषश्रवणादपरिमितेऽप्युच्यमाने प्रकारस्याभावादप्रकृतिवत् स्यात् । प्रकृतौ चोपात्तेध्मसंख्याप्रकाशनाद् अत्र च यावन्त इध्मा उपात्तास्तत्संख्याभिधातव्या । याः पुरस्तात्प्रस्रवन्तीत्याच्छिद्रकादयो (तै. ब्रा. ३।७।४।१) मन्त्रा यथालिङ्गं प्रणीताप्रणयनादौ द्रष्टव्याः छन्दसा ब्राह्मणेनेति (बौ. श्रौ. २४।१।१) अथापि मन्त्र एवेति (बौ. श्रौ. २४।१।३) च परिभाषावशेनाप्राकरणिकार्था एव परिभाषा प्राकरणिकानां विशेषविनियोगवचनात्[१०] प्रकरणे चाम्नानाद् विकल्पः । विशेषवचनं नित्यार्थम्[११] । यथा यत्कृष्णो रूपं (तै. ब्रा. ३।७।४।८) त्रिवृत्पलाशे दर्भ (तै. ब्रा. ३।७।४।११) इत्येवमादीनां, न

---

५. '°स्तरित°' मु० ।
६. 'गुप्तं नि°' गो० । 'तु नि' मु० ।
७. 'एषां....पक्षे' नास्ति मु० ।
८. 'प्रकरणार्थो' मु० ।
९. 'मन्त्र...पक्षे' नास्ति मु० ।
१०. इतोऽग्रे 'प्राकरणिकत्वात्' इत्यधिकः गो० ।
११. 'निवृत्य' मु० ।

ह्यसति[१२] अविशेषे प्रकरणे आम्नानं युक्तम् । प्रकरणे आम्नातानां आहत्योक्तानां च नित्यत्वं इतरेषां च विकल्प इत्येष विशेषः । वेदार्थो मुष्टिर्बर्हिर्लवनकाल एव ग्रहीतव्यः परिभोजनीयेभ्यो वा । वत्सज्ञुं शयितवत्सजानुसदृशम् । मूतवत्कार्यं मूतकार्यं, धान्यनिधानार्थः तृणपुञ्जसन्निवेशविशेषो मूतः । त्रिवृतं त्रिशिरसमूर्ध्वाग्रं मूले बद्ध्वा छिन्नं, कल्पान्तरस्यानुपादानादित एव नित्यार्थेऽपि नित्य एव काम्यः खदिरादिष्विव । आचार्याभिप्रायश्च द्वैधे एषामेवाचार्यभेदेनाकामसम्बन्धेन वचनात् । वेदिकरणम् अथ वेदमादत्ते (बौ. श्रौ. १।१०।१५) इत्यारभ्य ब्रह्मन्नुत्तरमित्येतस्मात् (बौ. श्रौ. १।११।२६) प्राक् पुनर्हविरभिवासनोत्तरकालं समाम्नातानामामावास्येन वा पौर्णमासेन वेति विपर्यासेन समाम्नातम् । पूर्वोक्तस्य पूर्वं वेदिकरणं इतरदितरस्य यथा स्यादिति । अनन्तरं पिण्डपितृयज्ञस्याम्नानात्पुनरपि दोहोपक्रमादितरत्र चौषधानन्तरं समाम्नानात् शाखान्तरे चामावास्यायां पूर्वेद्युर्वेदिं करोतीति । अथापराह्णे पिण्डपितृयज्ञेन चरतीति । शाखान्तरे चामावास्यायामपराह्णे (तु.- का. श्रौ. ४।१।१) इतिवचनाद् वाक्यशेषे सोऽमावस्यायां प्रत्यागच्छदिति (तै. ब्रा. १।२।१०।१) चामावास्यायामपराह्ण इति गम्यते ।।

**।। द्वितीयोऽध्यायः ।।**

## तृतीयोऽध्यायः

**अथैतस्यै शाखायै पर्णानि प्रच्छिद्याग्रेण गार्हपत्यं निवपति ।। अथैनामधस्तात्परिवास्य जघनेन गार्हपत्यं स्थविमदुपवेषाय निदधाति ।। अथास्याः प्रादेशमात्रं प्रमाय दर्भनाडीः प्रवेष्ट्य तत्त्रिवृच्छाखापवित्रं करोति** – त्रिवृत्पलाशे दर्भ इयान् प्रादेशसम्मितः । यज्ञे पवित्रं पोतृतमं पयो हव्यं करोतु मे **(तै. ब्रा. ३।७।४।११) इति ।। अथ सायं हुतेऽग्निहोत्र उत्तरेण गार्हपत्यं तृणानि संस्तीर्य तेषु चतुष्टयं संसादयति दोहनं पवित्रं सान्नाय्यतपन्यौ स्थाल्याविति ।। अथैनान्यद्भिः प्रोक्षति** – शुन्धध्वं दैव्याय कर्मणे देवयज्यायै **(तै. सं.१।१।३।१) इति त्रिः ।। अथ जघनेन गार्हपत्यमुपविश्योपवेषेणोदीचोऽङ्गारान्निरूहति** – मातरिश्वनो घर्मोऽसि **(तै. सं. १।१।३।१) इति ।। तेषु सान्नाय्यतपनीमधिश्रयति** – द्यौरसि पृथिव्यसि विश्वधाया असि परमेण धाम्ना । दृंहस्व मा ह्वाः **(तै. सं. १।१।३।१) इति ।।**

---

१२. '°नामनम्यास इति' मु०, म० । रज्ज्वादीनां

**तस्यां प्राचीनाग्रं शाखापवित्रं निदधाति** – वसूनां पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारं (तै. सं. १।१।३।१) इति ।। **तदन्वारभ्य वाचंयम आस्ते ।। अथ गा आयतीः प्रतीक्षते** – एता आचरन्ति मधुमद्दुहानाः प्रजावतीर्यशसो विश्वरूपाः । बह्वी-र्भवन्तीरुपजायमाना इह व इन्द्रो रमयतु गावः (तै. ब्रा. ३। ७।४।१४-१५) इति ।। **महेन्द्र इति वा यदि महेन्द्रयाजी भवति ।। अथाह** – उपसृष्टां मे प्रब्रूतात् (श. ब्रा. १।७।१।१०) इति ।। **उपसृष्टां प्राहुः ।। दोह्यमानामनुमन्त्रयते** – हुत स्तोको हुतो द्रप्सोऽग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्याम् (तै. सं. १।१।३।१) इति ।। **अथ पुरस्तात्प्रत्यगानयन्तं पृच्छति** कामधुक्षः (तै. ब्रा. ३।७।४।१६) इति ।। **अमूमितीतरः प्रत्याह ।। तामनुमन्त्रयते** –सा विश्वव्यचाः (तै. सं. १।१।३।१) इति ।। **तृतीयमानयन्तं पृच्छति** –कामधुक्षः (तै. सं. ३।७।४।१६) इति ।। **अमूमित्येवेतरः प्रत्याह ।। तामनुमन्त्रयते** –सा विश्वकर्मा (तै. सं. १।१।३।१) इति ।।

**तिसृषु दुग्धासु वाचं विसृजते** – बहु दुग्धीन्द्राय देवेभ्यो हव्यमाप्यायतां पुनः । वत्सेभ्यो मनुष्येभ्यः पुनर्दोहाय कल्पताम् (तै. ब्रा. ३।७।४।१७) इति ।। **महेन्द्रायेति वा यदि महेन्द्रयाजी भवति ।। विसृष्टवागनन्वारभ्य तूष्णीमुत्तरां दोहयित्वा ।। दोहनेऽप आनीय संक्षाल-नमानयति** – संपृच्यध्वमृतावरीरूर्मिणीर्मधुमत्तमा । मन्द्रा धनस्य सातय (तै. सं. १।१।३।१) इति ।। **अथैनत् तप्त्वोदगुद्वास्य शीती-कृत्वा तिरःपवित्रं दध्नातनक्ति** – सोमेन त्वातनच्मीन्द्राय दधि (तै. सं. १।१।३।१) इति ।। **महेन्द्रायेति वा यदि महेन्द्रयाजी भवति ।। यावता मूर्च्छयिष्यन्मन्यते तावदानयति ।।**

**अग्निहोत्रोच्छेषणमभ्यातनक्ति** – यज्ञस्य सन्ततिरसि यज्ञस्य त्वा सन्ततिमनुसन्तनोमि (तै. ब्रा. ३।७।४।१७) इति ।। **अथैन-दुदन्वता कंसेन वा चमसेन वापिदधाति** – अदस्तमसि विष्णवे त्वा यज्ञायापिदधाम्यहम् ।। अद्भिररिक्तेन पात्रेण याः पूताः परिशेरते (तै. ब्रा. ३।७।४।१७) इति ।। **तदुपरीव निदधाति यत्र गुप्तं मन्यते** – विष्णो हव्यं रक्षस्व (तै.सं. १।१।३।१) इति ।। **एतस्मिन् काले दर्भैः प्रातर्दोहाय वत्सानपाकरोति तूष्णीम् ।।**

## भवस्वामि-विवरणम्

एतस्या इति पर्णशाखाया मुख्यत्वख्यापनार्थम् । पर्णानि सत्सरुकाणि द्रष्टव्यानि पर्णत्सरुकाणामितिविनियोगे सत्सरुदर्शनात् । एनामिति शाखायाः प्राधान्यार्थम् । प्रयोजिका शाखा अप्रयोजक उपवेष इति ख्यापितं भवति । परिवास्य मूलतः छित्त्वा स्थविमत् स्थूलम्[1] उपवेषाय निदधाति । अस्या इति पर्णशाखायाः प्रकृतत्वात् अन्यस्या अपि ग्रहणं यथा स्यादिति सामान्यवचनम् । प्रादेशमात्रं मीत्वा प्रादेशमात्रमिति न शाखापरिमाणं, प्रादेशमात्रं दर्भनाडीः प्रवेष्ट्येति सम्बन्धः । शाखाया अधिकरणत्वेन श्रवणात्त्रिवृत्पलाश इति त्रिवृत्-पलाशशाखायामिति च । उपवेषणमपास्य शेषस्यैकदेशं प्रादेशमात्रं दर्भैस्त्रिवृतं करोति । छित्त्वा ग्रहणे मध्यस्य विनियोगावचनात् समत्वे चाधारत्वं गौणं स्यात् । दर्भगुणाभ्यां शाखया सह त्रिवृतं करोति ।

चतुष्टयग्रहणं प्रदर्शनार्थं रज्वादीनां प्रोक्षणलिङ्गमन्त्रे दर्शनादिति केचित् नियमार्थमित्यपरे । लिङ्गप्राप्तस्य विशेषानुक्रमणं सादनक्रमनियमार्थम् । तान्येव-मेव द्वन्द्वमिति परिभाषितत्वादिहापि तथा सादनीयानीति चतुष्टयं नित्यार्थम्[2] । प्रोक्षणस्य प्राधान्यात्संख्याप्रोक्षणेन सम्बध्यते । मन्त्रः सकृदेवाभ्यासकार्याभावात् । गोरमणं प्रति परार्थत्वादनूहशङ्कानिवृत्त्यर्थं महेन्द्र इति वा यदि महेन्द्रयाजी भवतीति तस्य सम्प्रदानत्वाद् रमणमात्मार्थमेवेति प्राधान्यादिन्द्रस्य नैमित्तिका-दूहितः । यदि शब्दाद् गतश्रियोऽपि सम्वत्सरमिन्द्रेज्यास्तीति बोधयति । वा-शब्दादगतश्रियोऽपि सम्वत्सरादूर्ध्वमनियम इति । दोह्यमानामिति प्रकृतिशब्देना-भेदेन विकारावगमात् द्रप्सा एवोच्यन्ते अन्यस्य कर्मणोऽश्रुतत्वात् । गोरेव हि कर्मत्वे स्तोकानामनुमन्त्रणमिति दुर्गमं स्यात् ब्राह्मणे च मन्त्रस्य स्तोकहोमा-र्थत्वदर्शनात् आनयन्तं स्थालीं प्रापयन्तं स्थाल्यां सिञ्चन्तमित्यर्थः आहराप आनयेति (बौ. श्रौ. १।९।२) भेदेन निर्देशादाहरणादन्यो नयत्यर्थो यथोक्त इति गम्यते । तथा चाप्रमत्तः सन्ततमानय दोहनेऽप आनीय संक्षालनमानयति (बौ. श्रौ. १।१।२५) तावदानयतीति (बौ. श्रौ. १।१।२७) च कामधुक्ष इत्येतावान् मन्त्रः । अमूमिति च नामवचनमात्रं[3] महेन्द्रायेत्यवचनात् अच्छिद्रकाणां समस्त-पाठात् ब्राह्मणे चामुमिति नाम गृह्णातीति (तै. ब्रा. ३।२।३।७) वचनात् प्रतीकेन मन्त्रोपदेशे सति[4] विशेषविधानशक्यत्वात्प्रश्नप्रतिवचनयोश्च समाप्त-त्वात्[5] । अन्ये उभयोर्मन्त्रयोः प्रतीकग्रहणमित्याहुः । महेन्द्रायेति वचनं (तै. सं. २।५।४।४) इतरेषां प्रदर्शनत्वात्तेषु वचनमिन्द्रशब्दस्य पठितत्वादिह[6] वचन-

---

१. 'स्थूलम्' नास्ति गो०, पा० ।
२. 'तान्येव°....र्थम्' नास्ति म० ।
३. 'नाम न वचन°' पा०, वा० ।
४. 'सति' नास्ति पा०, मु०, म० ।
५. 'विधाना...त्वात्' नास्ति मु० ।
६. 'प्रतित°' गो०। 'प्रतीक°' पा०,वा०।

मुपपद्यते[७] । अभिधानवैचित्र्यात् असमस्तपाठाद् ब्राह्मणे च मन्त्रस्य रूपादेव प्राप्तत्वान्नामग्रहणमेव विधीयते । भद्रमेवासां कर्माविष्करोतीति (तै. ब्रा. ३।२।३।७) प्रतीकपक्ष एव उपपद्यते । प्रैषाभ्यासे वक्तव्येऽवचप्रयोजनमपद्येकद्विग्रहे[८] निवृत्त्यर्थं प्रश्नाद्युपक्रमश्च प्रैषस्य निवृत्त्यर्थम् इति केचित् । अन्येषां प्रश्नाद्यावृत्तिवचनं बहुत्वपक्षे प्रदर्शनार्थम्[९] । प्रैषाभ्यासवचनं चैकत्वपक्षे प्रश्नाद्यनभ्यासार्थमिति बहु दुग्धीति सकृदेव त्रित्ववचनस्य मन्त्रान्तरविषयत्वात्[१०] त्रिर्वा प्रत्येकमनुक्रान्ताभिसम्बन्धात् । बहु दुग्धीति चैकवचनस्य गोविषयस्यैवमर्थत्वात् तिसृषु दुग्धास्विति च इतरथाथ वाचं विसृजत इत्येवावक्ष्यत् तेनास्य विकल्पः । ब्राह्मण उक्तत्वादिहावचनं प्रत्यक्षविहितेनानारभ्याधीतस्यानुमानिकस्य विकल्पस्य न्याय्यत्वाद् विकृतौ निवेशे प्राप्ते आचार्यस्य वचनात् श्रुत्यन्तरमनुमीयते नह्येकस्मात् प्रमाणादाचार्योऽब्रवीदिति । बहु दुग्धीति प्रैषासम्भवात् त्रिरित्यवचनाच्च सकृदेव मन्त्र इत्यपरम् । मन्त्रो विकृतौ न प्रवर्तते पुनराप्यायनप्रयोजनाभावात् उत्तरवाक्ये[११] च पुनः शब्दस्य पुनरुपादानत्वात् । हव्यमिति स्वार्थिकत्वात् तद्धितस्य प्रकृत्यन्तरस्य प्रतीकोपादादेक एव मन्त्र इत्यपरे एतस्मिन्दर्शनेऽभ्यसितव्यो ब्राह्मणवचनात् । तूष्णींग्रहणं वागिन्द्रियव्यापारनिवृत्तौ आवृत्प्रसङ्गेऽनन्वारभ्येत्यावृन्निवृत्त्यर्थम् । षडवमा (बौ. श्रौ. २४।२३।१०) इति न परिसंख्यार्थम् । एवमपरिमितानामितीदमुपपद्यते[१२] । चतुर्थे स्रुवे तृतीये स्रुवे (बौ. श्रौ. २०।४) इति स्रुवन्नित्यवत्कृत्वा संख्याविकल्पवचनात् स्रुवेणातञ्चनं तयोः स्रुवनियमः । इह तु पक्षान्तरमपि सम्भवति येन केनचित् सकृदेव यावता मूर्च्छयिष्यन्निति इह वचनात् ।

आपः प्रोक्षणीशेषाः तिरःपवित्रमतिनीता आपो धारयेति (तै. ब्रा. ३।७।४।१४) लिङ्गाद् धारणस्यान्याप्रयोजनादिह वचनात् इत्येके । तदुपपन्नं, इह प्रोक्षणीनां मन्त्रानाम्नानात् देवेन सवित्रा (तै.ब्रा.३।७।४।१४) इत्यसम्भवः । अवचनाच्च इहस्थानां च इहस्थानामाप्तिलिङ्गान्मन्त्रानाम्नानात्[१३] च पुरोडाशीय प्रोक्षणीषु स्थानाच्च लिङ्गं बलीयः । अयं चाभिप्रायः आचार्यस्येति गम्यते अतिशिष्टाः प्रोक्षणीर्निधायेति (बौ.श्रौ.१।६।६) वचनात् आहरन्त्येताः प्रोक्षणीरभिपूर्येति (बौ. श्रौ. १।११।३०) धारणं देवेन सवित्रोत्पूता (तै.ब्रा. ३।७।४।१४) इति वचनं तत्रोपपद्यते । तस्मात्तत्र युक्तो मन्त्रः प्रैषवचनाच्च याजमानमेवं च मन्त्रार्थवाद उपपन्नो भवति, तस्मादुदकमात्रस्य ग्रहणम् । अद्भिररिक्तेन इत्युप-

७. '°दिहपाठादवचन' सार्वत्रिकः, मु० विहाय ।
८. '°द्येत गो विग्र°' पा० ।
९. इतोऽग्रे 'प्रैषाभ्यासस्य' गो०, म०, ब०।
१०. 'मन्त्रोत्तर°' गो० ।
११. 'उरादेकत्वे' गो० । 'उरादेमिप्रायत्वे' पा०, बा० ।
१२. '°मितार्थवादउप' मु०, म० ।
१३. 'इहसस्थात्रापिलि°' गो० ।

पद्यते, इमौ पर्णं चेति (तै. ब्रा. २।७।४।१५) पवित्रमपिधाने निदध्यात् । कमण्डलुभिरित्यादौ पूता इत्युपपन्नं भवतीति अनियमः । प्रोक्षणीशेष पक्षे हव्यं हि रक्षसीत्यागम्यपेक्षमपि[१४] सम्भवतीति ।

अपाकरणं वत्सानां शाखाया विनियुक्तत्वात् आख्यान्तरप्रतिपत्तौ दोषाभिधानाभावात् अन्यश्चाभावात् पर्णशाखया वत्सानपाकरोतीति[१५] च कृतार्थत्वात् मन्त्राणां च तत्सम्बद्धत्वात् प्रकृतौ च कृत्स्नविधानाच्छाखामाच्छिनत्तीति चैकत्वस्य विवक्षितत्वात् साधारणत्वेऽपि तूष्णीं दर्भैरित्युक्तम् । दर्भैरिति वचनमुत्प्रेक्ष्यम् । अशनवचनमशनपरिग्रहार्थं ब्राह्मणोक्तपरिग्रहार्थं वा । एतदेव युक्ततरं दृश्यते । अशनानशने (बौ. श्रौ. २०।४) द्वैधसूत्रमौपमन्यवस्येत्युक्तत्वाद् द्वयोरुपन्यासेन लघीयसा[१६] सिद्धे त्रयाणामुपन्यासादनशनमेवाभिप्राय इति गम्यते ॥

॥ तृतीयोऽध्यायः ॥

---

१४. '°गमव्यपे°' म०।
१५. '°खया च वत्सा°' मु०।
१६. 'बलीयसा' गो०।

# ĀPASTAMBA ŚRAUTASŪTRA

## with

### The Commentary of Rudradatta

Edited by
Radhey Shyam Shastri

## INTRODUCTION

The great Sanskrit scholar of Germany, Richard Garbe (1857-1927) prepared the *editio princeps* of this work which was published by the Asiatic Society, Calcutta, in 1882 and 1885. (The 3rd volume was published in 1902 which contains only the Sūtra, as the commentary of Rudradatta has come, so far, to light only upto the 15th Praśna).[1] This may be regarded a critical edition, for the editor used many MSS., (See his Preface) both of the Sūtra and the commentary, although he has not recorded the variant readings of the commentary.

Another edition of this work was published in 1909 at Kumbhakoṇam which runs only upto the 7th Praśna. This being in the Grantha script was accessible only to a limited number of scholars. Hence for over a century Garbe's edition has re-mained the basis of all studies regarding this Sūtra and thus it has rendered a great service to the Vedic studies.

The Grantha edition does not mention the MSS. used by the editor. Though, on the title page it says नानादेशानीतप्राचीन-तालपत्रकोशानुसारेण श्रौतविद्भिः पण्डितवरैः सम्यक् परिशोध्य, it is almost similar to Garbe's edition which gives one the impression that the editor has followed Garbe.

A work entitled दर्शपूर्णमासप्रकाशः was published by आनन्दाश्रम, पुणे in 1924. It also contains Praśnas 1- 4 with the commentary of Rudradatta (named Dīpikā). Evidently, the editor has

1. All the three vols. were reprinted under my guidance by Munshiram Manoharlal, Delhi, 1983.

based his text on Garbe's edition, so I do not consider it an independent edition.

The Mysore edition of this Sūtra with the Bhāṣya of Dhūrtasvāmin cites from the Dīpikā from 1 to 8 Praśnas in footnotes. These are taken from Garbe. For Praśnas 9-10, this edition gives the complete text of the Dīpikā. The editor says in the Introduction that for this he has also used a ms. of the Dipikā (No. C 1370). I possess a xerox copy of this ms. which contains 1 -15 Praśnas along with the Sūtra-text.

Rudradatta was a native of Maharashtra (which I will show in the detailed Introduction). Garbe was fortunate in having a MS. of the Dīpikā which, in his own words, is described as "An ancient, excellent, and accurately corrected MS." It is due to this MS. that Garbe could prepare an excellent edition. I have collected about ten MSS. of each Praśna and I am sorry to say that none of these is accurate. Still, with their collective aid, the text presented by Garbe can be improved. So I have taken Garbe's text as tentatively accepted one and tried to improve it with the help of the other MSS. Today there is known a large number of the mss. of the Dīpikā and it is neither practicable nor necessary to collate them all.

Garbe's edition requires to be revised in the following directions :

1. There are some wrong readings.
2. At some places the punctuation is wrong which shows that there Garbe could not understand the text properly.
3. No references are given.
4. Sometimes the division of the Sūtras is contradictory to the commentary.
5. In a few cases, the sūtra-text also requires revision.

   In the following pages, I present a specimen of the revised edition. A description of all the five points is given below.

## 1. Wrong readings corrected (page and line are of Garbe's edition)

| Page | Line | Garbe's reading | Revised reading |
|---|---|---|---|
| 1 | 5 | ध्याये | ध्यायेत् |

| | | | |
|---|---|---|---|
| | 8 | °मध्यस्थित° | °मध्यक्षित° |
| | 12 | सुविवक्तार: | सुविवेक्तार: |
| 3 | 5 | स्व आयतने | स्व एवायतने |
| | 5 | परिगृह्णामि | परिगृह्णाति |
| | 6 | कर्मविधि° | मन्त्रविधि° |
| | 7 | इति | इति च |
| 4 | 6 | तत्र प्रणयनप्रसङ्गः | तत्राप्रणयनप्रसङ्गः |
| | 7 | ब्रवीदिति | वादीदिति |
| 5 | 1f.b. | यदाभ्यास°[1] | पदाभ्यास° |
| 6 | 5 | यस्य | या |
| | 10 | ऋजुकरोति | ऋजूकरोति |
| | 10 | °नुलोममनुमार्ष्टि | °नुलोमं मार्ष्टि |
| 9 | 5 f.b. | अध्वर्योरायतनं | see footnote in the text |
| 10 | 10 | प्रतितप्स्यति | प्रतितपति |
| 11 | 6 | °ऽनेन | See footnote in the text |

Sometimes, I have adopted a correct reading without mentioning the mss. which contain it. It was done to expedite the work. So, whenever a reading different from Garbe's is found, it must be taken for granted that it is based on MSS. In the above list पदाभ्यास, या, ऋजूकरोति, °नुलोमं मार्ष्टि, प्रतितपति are such readings. Nowhere have I emended the text. The emendations have been suggested in the footnotes. In the given specimen, I have suggested two for which see the above mentioned footnotes.

At page 8, line3, Garbe conjectures प्रतियोगिकेन for प्रतियोगित्वेन (see his Vol. I, P. 469). But प्रतियोगित्वेन, which is found in all the MSS., is the correct reading. प्रतियोगिकेन has no sense here. It shows that Garbe was not good at the terminology of the Navya-nyāya system in 1882 when he was only 25 years old.

There are some cases where even though Garbe's reading is correct, yet I have adopted another reading because it is supported by more MSS. or due to some other obvious grounds. Such cases are listed below :

| Page | Line | Garbe's edition | Revised edition |
|---|---|---|---|
| 1 | 4 | श्रीवत्सवक्षसे | श्रीवत्सलक्ष्मणे |

1. It cannot be a misprint; for a number of MSS., even the Grantha edition, has this reading.

| | | | |
|---|---|---|---|
| | 6 | मुनिं स्तुमः | ऋषिं नुमः |
| | 7 | °ऽप्यन्यथा° | °ष्वन्यथा° |
| 2 | 5 f.b. | वाक्यानुवन्दितौ | वाक्यानूदितौ |
| 4 | 8 | °स्यैवायमनुवादः | °स्यैवार्थस्यानुवादः |
| 6 | 1 | प्रतिषेधः | प्रतिषेधस्तु |
| 11 | 1 | मन्यत इति | मन्येत इति |

**2. Wrong punctuation corrected**

| Page | Line | Garbe's reading | Revised reading |
|---|---|---|---|
| 1 | 5 f.b. | अत्र भगवान् | अत्रभगवान् |
| 2 | 2 | प्रयुज्यते । वृद्धैः | प्रयुज्यते वृद्धैः । |
| | 8 | °र्शनात् । अमा.....वाच्यम्।। | °र्शनात् अमा....वाच्यम्, |
| 4 | 4 | °दुक्तमिदम् । यद्दर्श° | °दुक्तमिदं यद्दर्श° |
| | 5 | प्रत्यवशिष्यते न्यायत | प्रत्यवशिष्यते । न्यायत |
| 6 | 6 | भेत्तव्यम् । या | भेत्तव्यं या |
| 8 | 4 | सांनाय्यदेवता । निगमे | सांनाय्यदेवतानिगमे |
| 11 | 8 | दर्शिता । अथो | दर्शिता–अथो |
| | 9 | भवतीति तस्यै° | भवतीति । तस्यै° |
| | 7 f.b. | °यीष्यते तथै° | °यीष्यते, तथै° |

**3. References**

In the first three Kaṇḍikās which cover only 13 pages of Garbe's edition, I have given 70 references, whereas Garbe gives none.

**4. Sūtra-division**

There is only one case in the given specimen. In the 3rd Kaṇḍikā, Garbe takes देवस्य त्वा सवितुः प्रसव इत्यसिदमश्वपर्शुं वादत्ते तूष्णीमनडुत्पर्शुम् ।२। as one Sūtra. But Rudradatta in the commentary writes गतौ(योगौ अर्थौ वा). I think it is necessary that the Sūtra-division must be in conformity with the commentary. Accordingly I have divided this sūtra like this : देवस्य त्वा सवितुः प्रसव इत्यसिदमश्वपर्शुं वादत्ते ।।२।। तूष्णीमनडुत्पर्शुम् ।।३।। . This has resulted in increasing the number of the following sūtras by one, thus causing the concordances and indices based on Garbe's edition slightly wrong. But this is unavoidable.

**5. Sūtra-text**

I have preferred व्याहृतिभिर् to व्याहृतीभिर् in 1.1.7 for व्याहृतिभिर् is found at 12 and व्याहृतीभिर् at 7 places in my source material. Though both the forms are available in the Vedic language, yet the majority always favours the *Hrasva*-form. In addition, I have recorded the following variants.

| | |
|---|---|
| 1.1.4 | जपति ।।४।। for जपित्वा |
| 1.3.5 | पर्शू for पर्शुम् |
| 1.3.13 | इति सव्यहस्तेन संयच्छति for इति संयच्छति |
| 1.3.16 | लुनाति for लुनोति |

Naturally some misprints have been corrected. They are :

| Page | Line | Incorrect | Correct |
|---|---|---|---|
| 2 | 11 | एवशब्दो | एव शब्दो |
| 3 | 10 | बिलम्बिष्ट | विलम्बिष्ट |
| 11 | 5 f.b. | यदप्यस्याविशेषणं | यदप्यस्या विशेषणं |

A special feature of this edition is worth mentioning. Āpastamba gives only the Pratīka of the Mantras of the तैसं. I have given in footnotes the remaining part of the Mantra. Thus this edition will help to know the full Mantra to be used at a particular rite.

The text is based on the following materials :

**1) The Sūtra**

**Printed editions**

गा– Garbe's edition with the Dīpikā.

चि– Chinnaswami's edition with the Bhāṣya of Dhūrtasvāmin, Baroda.

मै.धू.–Mysore edition with Dhūrtasvāmibhāṣya and Rāmāṇḍāra Vṛtti.

द– Darśapūrṇamāsa-prakāśa, Pune.

कु– Kumbhakoṇam-edition with the Dīpikā (in Grantha script).

**Manuscripts**

वै.म.–A complete ms. of आपस्तम्बकल्पसूत्र from वैदिक संशोधन मंडल, पुणे .

वा सा अ इ फ ब[१] सं मै– These 8 mss.(described below) contain the Sūtra-text also along with the Dīpikā.

2) **Rudradatta's commentary called Sūtradīpikā or Dīpikā**

### Printed editions

गा– Garbe

कु– Kumbhakoṇam

### Manuscripts

वा– प्राज्ञपाठशाला मंडल, वाई (महाराष्ट्र) प्रश्न 1-15

सा– साङ्गवेदविद्यालय, काशी । प्रश्न 1, 7, 8, 9, 10-13 (3 mss.), 14 (2 mss.)

अ– राजस्थान प्राच्य विद्या प्रतिष्ठान, अलवर । प्रश्न 1-5, 8-15

इ– भारत इतिहास संशोधक मंडल, पुणे । प्रश्न 1-15

फ– फर्ग्युसन कालिज, पुणे । प्रश्न 1-15

ब१– M. S. University, Baroda प्रश्न 1-15 (प्रश्न 8-9 partly missing)

ब२– M. S. University, Baroda प्रश्न 1-6 and a part of 7

ब३– M. S. University, Baroda प्रश्न 1-4, 8-9

वै– वैदिक संशोधन मंडल, पुणे । प्रश्न 1-7

भ१– Bhandarkar Oriental Research Institute, Poona. प्रश्न 1-9

भ२– Bhandarkar Oriental Research Institute, Poona. प्रश्न 1-8

भ३– Bhandarkar Oriental Research Institute, Poona. प्रश्न 5

सं– संपूर्णानन्द संस्कृत विश्वविद्यालय, काशी । प्रश्न 1-15

मै– Oriental Research Institute, Mysore. प्रश्न 1-15

त– Sarasvatī-Mahal, Tanjore. In the catalogue of this excellent library, the beginning and ending portions of a MS. of Dīpikā are given. I have compared just the five Maṅgala-ślokas from this. Garbe used this MS. for Praśnas 1-3 and 8-15.

All these MSS. are in Devanagari script. Details of the MSS. will be given in the detailed introduction to the forthcoming edition.

I express my sincere thanks to all those who have helped me in procuring the MSS. or otherwise. Their names will also appear in the detailed introduction. Suggestions to improve this edition are most earnestly invited.[1]

1. Where no work is mentioned, citations are from the Āpastamba Śrauta itself. The abbreviations of the Vedic works are wellknown to scholars.

# आपस्तम्बीयं श्रौतसूत्रम्
## रुद्रदत्तवृत्तियुतम्

### प्रथमः प्रश्नः

**अथातो दर्शपूर्णमासौ व्याख्यास्यामः ।।१।।**

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये[१] ।।
आज्ञा श्रुतिस्मृती यस्य यस्य यज्ञाः सभाजनम्[२] ।
नमः परस्मै विश्वस्मात्तस्मै श्रीवत्सलक्ष्मणे[३] ।।
आदिमं ब्रह्मणः कोशमध्यक्षितपरावरम्[४] ।
अपास्तरोषपाप्मानमापस्तम्बमृषिं नुमः[५] ।।
आपस्तम्बीयसूत्रार्थेष्वन्यथाज्ञानसंशयान्[६]।
सूत्रदीपिकया वृत्त्या रुद्रदत्तः परास्यति ।।
सन्तु[७] ये सुविवेक्तारः[८] सन्तः स्युर्गुणसाक्षिणः[९] ।
रत्नं रत्नमिति ग्राह्यं मूल्यं किं तस्य गृह्यते ।।

अत्रभगवानापस्तम्बः समस्तलोकहितकाङ्क्षी विध्यर्थवादमन्त्रात्मकविविध-वेदभागव्याकीर्णं विभक्तानेकशाखाव्यासक्तं च विश्वस्य वैतानिकस्य कर्मणो याजुर्वेदिकं प्रयोगं व्याचिख्यासुस्तत्र सर्वप्रथमभाविनोऽग्न्याधेयस्य सेष्टिकत्वात्सर्वेष्टीनां च दर्शपूर्णमासप्रकृतित्वात् समाम्नाये च दर्शपूर्णमासमन्त्राणामेव प्राथम्यात्तावेवाग्रे व्याख्यास्यन्नधिकारं दर्शयति 'अथात' इति । अथातःशब्दोऽयं प्रकरणारम्भे प्रायः प्रयुज्यते वृद्धैः । क्वचिदानन्तर्येऽपि, यथा इमे भृगवो व्याख्याताः (२४.६.९) अथातोऽङ्गिरसाम् (२४.६.१०) इत्यादौ । न पुन-रिहानन्तर्यार्थः, वृत्तस्य कस्यचिदनन्तरस्यानुपलम्भात् । न दृश्यतेऽस्मिंश्चन्द्रमा इति विपरीतलक्षणया दर्श इत्यमावास्योच्यते । न त्वियमन्वर्थसंज्ञेति, चन्द्रदर्शनस्य सर्वतिथिसाधारण्यात् । न च सूर्येण संगतो दृश्यत इति विशेष्टव्यं सूर्यसंगतेरमावास्याशब्दप्रवृत्तिहेतोर्दर्शनात् अमा सह वसतोऽस्यां चन्द्रार्काविति वाच्यम्, अतितेजस्विसूर्यमण्डलान्तर्विलीनः क्षीणकलश्चन्द्रमाः सिद्धैरेव दृश्यते

नास्मद्विधैरिति । तत्रापि सिद्धदर्शनस्याविशेषकत्वादस्मद्दर्शनपरिसंख्यापर एव शब्दोऽभ्युपगन्तव्य इति स एवार्थश्छद्मनोक्तः स्यात् । न चासौ प्राञ्जलः विवक्षिततिरोधानात् सूत्रकृतैव विपरीतलक्षणया विवरणाच्च यथा यदहर्न दृश्यते तदहरमावास्या (२४.२.२४) इति । तस्माद्यथोक्त एवार्थः शोभते । मासश्चन्द्रः यदाहुर्नैरुक्ताः मासो मानात्कालश्चन्द्रश्चेति[१०] । स पूर्यते यस्मिन् तदहः पूर्णमासः । दर्शश्च पूर्णमासश्च दर्शपूर्णमासौ । इह च दर्शपूर्णमासाख्यकालचोदितानामाग्नेयादिप्रधानानां यौ विद्वद्वाक्यानूदितौ[११] समुदायौ य एवं विद्वान् पौर्णमासीं......य एवं विद्वानमावास्याम् (तैसं १.६.९) इति, तयोरपि तत्तत्कालसंबन्धेन दर्शपूर्णमासाविति नामनी । तत्र पूर्णमासस्य प्रयोगतः प्रथमत्वेऽपि दर्शशब्दस्याल्पाच्तरत्वात्पूर्वनिपातः । तौ व्याख्यास्यामः । श्रुतौ संक्षिप्तयोः व्याकरणेन शाखान्तरोपसंहारादिना च विस्पष्टीकरणं व्याख्यानम् ।

१. अस्मात् श्लोकात्पूर्वमधिकः पाठ इत्थम्—
गा— श्रीगणेशाय नमः । ओम्
सं ब$_१$ वा— श्रीगणेशाय नमः । श्रीमार्तंडभैरवाय नमः ।
सा— श्रीमहागणपतये नमः ।
मै भ$_१$ फ इ— श्रीगणेशाय नमः ।
भ$_२$ — श्रीगणेशाय नमः । श्री विश्वेश्वराय नमः । श्री कालभैरवाय नमः ।
अ ब$_२$ ब$_३$ वै—अयं श्लोको नास्ति ।
त —अस्य श्लोकस्य स्थाने निम्नलिखितः श्लोक उपलभ्यते—
स्वं स्वं मनोरथमवाप्तुमपोढविघ्नं
यस्य प्रसादमनवाप्य न शक्नुवन्ति ।
पद्मासनप्रभृतयः प्रथमेऽपि देवास्
तद्वस्तु हस्तिमुखमस्तु मयि प्रसन्नम् ॥
सर्वे कोशाः — ध्यायेत् । गा-ध्याये ।
ध्यै-धातुः परस्मैपदी, अतः 'ध्याये' न साधु ।
कदाचित् मुद्रणकाले अक्षरपातोऽयम् ।
२. सं वा सा इ फ ब$_१$ मै — सभाजनाः ।
३. गा कु — श्रीवत्सवक्षसे ।
अस्मात् श्लोकात्पूर्वमधिकः पाठः —
अ— श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।
ब$_२$—श्रीगणेशाय नमः ।
ब$_३$—श्रीवेदव्यासाय नमः ।

वै– श्रीगणेशाय नमः । श्रीगुरुदेव । श्री आपस्तंबाय नमः ।

४. आदिमं श्रेष्ठं, ब्रह्मणः वेदस्य कोशं निधिम्, अध्यक्षितं प्रत्यक्षितं परावरं येन सः अध्यक्षितपरावरम् । अयं शुद्धः पाठः वा ब$_{१}$ मै कोशेषु उपलभ्यते ।

गा कु – कोशमध्यस्थित॰

इ सं सा भ$_{१}$– कोशं मध्यक्षिति॰

फ– कोशं मध्यक्षितं

ब$_{२}$ ब$_{३}$– कोशं मध्यः क्षिति॰

वै– कोशमध्यक्षिति॰

त– आदिमं ब्राह्मणं क्षेममध्यस्थित॰

भ$_{२}$ अ– अयं श्लोको नास्ति ।

५. त– अपास्ताशेष॰ ।

भ$_{१}$–ऋषिं नुमः ।

गा कु – मुनिं स्तुमः ।

मै सं वा सा इ फ ब$_{१}$ ब$_{२}$ ब$_{३}$ वै – ऋषिं मुनिं

६. गा कु – ॰सूत्रार्थेऽप्यन्यथा॰

ब$_{२}$ ब$_{३}$– अथापस्तम्बसूत्रार्थविपर्याज्ञानसंशयान्

वै– अथापस्तम्बसूत्रार्थेष्वन्यथाज्ञानसंश्रयान्

त– अस्यापस्तम्बसूत्रस्य दुर्ज्ञानिज्ञानसंशयान्

मै सं वा सा अ इ फ ब$_{१}$ भ$_{१}$ भ$_{२}$ – यथास्वीकृतम्

७. मै सा अ ब$_{२}$ ब$_{३}$ – सन्ति

८. गा कु भ$_{२}$ – सुविवक्तारः

मै सं वा सा अ इ फ ब$_{१}$ ब$_{२}$ ब$_{३}$ वै भ$_{१}$ – सुविवेक्तारः

९. सा अ – स्युर्गुणतोषिणः

१०. यास्कीयनिरुक्ते (४.२७) तु 'मासा मानात्' एतावदेव लभ्यते । परन्तु सर्वेषु कोशेषु यथामुद्रितपाठ एव लभ्यते ।

११. इत्थं कु अ

वै भ$_{१}$ ॰नुदितौ

ब$_{२}$ ब$_{३}$ ॰नुमितौ

सं गा वा इ फ ब$_{१}$ ॰नुवन्दितौ

मै सा ॰नुवदितौ

**प्रातरग्निहोत्रं हुत्वाऽन्यमाहवनीयं प्रणीयाग्नीनन्वादधाति ।।२।।**

अन्वाधानं नाम अग्नौ काष्ठाधानं, तच्च कर्माङ्गत्वेन सुरयादि-

गुणविशिष्टानामग्नीनां ग्रहणार्थं तद्द्वारेण देवतापरिग्रहार्थं च । कुतः? अग्निं गृह्णामि सुरथं यो मयोभूः (तैब्रा ३.७.४.३), स्व [१२]एवायतने देवताः परिगृह्णाति[१३] (तैसं १.६.७) इति [१४]मन्त्रविधिवाक्यशेषाभ्यामग्निं गृह्णाति[१५] देवताश्च[१६] परिगृह्णाति[१७], स्व आयतने (तैब्रा ३.७.४.३-५) इति च[१८] मन्त्रलिङ्गात् । तथा ममाग्ने वर्चो विहवेष्वस्त्विति पूर्वमग्निं गृह्णाति, तूष्णीमितरौ (भा.४.१.४,५) इति भारद्वाजवचनाच्च । प्रातरग्निहोत्रं हुत्वा इत्यनुवाद आनन्तर्यार्थः यथा औपवसथ्येऽह्नि प्रातरग्निहोत्रं हुत्वा प्रागेवान्येभ्यः कर्मभ्योऽन्वादध्यात् मा विलम्बिष्ट मा चाहुतेऽन्वादध्यादिति । अविलम्बश्च ब्राह्मणे प्रशस्यते यो वै देवताः पूर्वः परिगृह्णाति (तैसं १.६.७) इति । मन्त्रवर्णश्च भवति तान्देवान्परिगृह्णामि पूर्वः (तैब्रा ३.७.४.३) इति । अर्थादन्यत्वे सिद्धे अन्यमाहवनीयं प्रणीयेति किमर्थम्? दर्शपूर्णमासावारभमाणस्य चतुर्होत्रर्थाग्निव्युदासार्थमिति केचित् । तदयुक्तं, सर्वदर्शपूर्णमासप्रयोगसाधारणस्यैव तन्त्रस्याधिकारात् । तत्र नामैतद्वक्तव्यं यत्र तयोरारम्भोऽभिधायिष्यते, वक्ष्यन्ते च तद्वैशेषिका धर्मास्तत्रैव दर्शपूर्णमासावारप्स्यमान (५.२४.७) इत्यादिना । तस्मान्न तदर्थं वचनम् । किमर्थं तर्हि? माऽग्निहोत्रार्थोऽग्निरन्वाधायीति । कः प्रसङ्गः? अस्ति परमतेन । यथाह भारद्वाजः य एवैषोऽग्निः[१९] अग्निहोत्राय प्रणीतस्तं गृह्णीयादित्याश्मरथ्योऽन्यं प्रणीयेत्यालेखनः (भा ४.३.१) इति । दक्षिणाग्नेरपि आहार्यस्याधानक्रमेणार्थसिद्धा स्वयोनित उत्पत्तिः ।

१२. गा कु अ ब$_{२}$ ब$_{३}$ वै भ$_{१}$ भ$_{२}$ – 'एव' नास्ति
१३. सं गा कु इ ब$_{२}$ ब$_{३}$ वै भ$_{१}$ – परिगृह्णामि
१४. गा कु सा वै – कर्मविधि°; मै – मंत्रकर्मविधि°
१५. सा ब$_{२}$ ब$_{३}$ वै भ$_{१}$ भ$_{२}$ – गृह्णामि
१६. सा ब$_{२}$ ब$_{३}$ वै भ$_{१}$ – 'च' नास्ति
मै सं वा इ फ ब$_{१}$ – 'ताः पूर्वः' इति चकारात्परमधिकः पाठः
१७. सं वा सा इ फ ब$_{२}$ ब$_{३}$ वै भ$_{१}$ मै – परिगृह्णामि
भ$_{२}$ – 'देवताश्च परिगृह्णाति' इति नास्ति
अ – 'परिगृह्णाति स्व आयतने इति च मन्त्रलिङ्गात्' इति नास्ति
१८. सं गा कु वा फ ब$_{१}$ – 'च' नास्ति
१९. भारद्वाजसूत्रे 'अग्निः' नास्ति परन्तु 'फ' कोशं विहाय सर्वेषु अस्ति ।

## न गतश्रियोऽन्यमग्निं प्रणयति ।।३।।

अनुसंधास्यति स्वयमेव गतश्रीशब्दार्थम् । तस्यान्यं न प्रणयेत् ।

[२०]नन्विदमपार्थकं वचनं, नित्यो गतश्रियो ध्रियत (६.२.१२) इत्यनेनैव सिद्धत्वात् । सत्यमत्रापार्थकं, वरुणप्रघासेषु तु[२१] दक्षिणविहारार्थं[२२] भविष्यतीत्येके । सम्यक् तावदुक्तमिदं[२३] यद् दर्शपूर्णमासौ व्याख्यास्यामः (१.१.१) इत्यधिकृत्य वरुणप्रघासा[२४] व्याख्यायन्त[२५] इति पर्यनुयोगः[२६] प्रत्यवशिष्यते[२७]। न्यायत एव च[२८] तत्राप्रणयनप्रसङ्गः[२९] । तस्मादनन्तरेणैव प्रणयनानुवादेन गतश्रियोऽप्यन्वाधास्यतोऽन्यः प्रणेतव्य इति मा कश्चिद् वादीदिति[३०] सिद्धस्यैवार्थस्यानुवादः[३१] स्पष्टत्वाय[३२] कथनमिति[३३] । नन्वेवमपि 'न गतश्रियः प्रणयति' इत्येतावद्वक्तव्यं, किमन्यग्रहणेनाग्निग्रहणेन वा । इदं तावदग्रे विदांकुर्वन्तु तत्रभवन्तः यन्नातिसूक्ष्मेक्षिकया[३४] शैल्या शब्ददरिद्रः सूत्रकारः । किं तर्हि? व्यक्ताभिर्वचनव्यक्तिभिरर्थान् आचष्टे[३५] इति । तदलमनेन[३६] आक्षेपक्लेशेन ।

२०. सा अ इ ब$_२$ ब$_३$ वै भ$_१$ भ$_२$ सं मै – नन्वेतद°

२१. वा इ फ ब$_१$ सं - तद् । अ – नास्ति

२२. वा फ ब$_१$ – °रार्थे

२३. अ – °दिदमुक्तं

२४. ब$_२$ ब$_३$– °प्रघासो

२५. ब$_२$ ब$_३$ – व्याख्यायत । कु – व्याख्यास्यन्त

२६. अ ब$_२$ ब$_३$ वै भ$_१$ भ$_२$ – 'पर्यनुयोगः' नास्ति । पर्यनुयोगः = दूषणार्थः प्रश्नः

२७. वा इ फ ब$_१$ ब$_२$ ब$_३$ वै भ$_२$ सं – प्रत्यवसिष्यते । प्रत्यवशिष्यते एव साधु, अर्थस्तु समाधीयते इति ।

२८. अ ब$_२$ ब$_३$ वै भ$_१$ भ$_२$ – च न्यायत एव

२९. गा कु अ ब$_२$ ब$_३$ वै भ$_१$ भ$_२$ – तत्र प्रणयनप्रसंगः

३०. गा कु वा अ इ फ ब$_१$ भ$_१$ भ$_२$ सं – ब्रवीदिति

३१. गा अ – सिद्धस्यैवायमनुवादः । कु – सिद्धस्यैवानुवादः । सा ब$_२$ ब$_३$ वै भ$_१$ भ$_२$ मै – सिद्धस्यैवार्थस्य

३२. सा ब$_२$ ब$_३$ वै भ$_१$ भ$_२$ मै – नास्ति

३३. अ – नास्ति

३४. सा – सूक्ष्मेहिकया

३५. गा कु अ ब$_२$ वै भ$_२$ – व्याचष्टे

३६. कु – 'अनेन' नास्ति

**देवा गातुविदो गातुं यज्ञाय विन्दत । मनसस्पतिना देवेन**

**वाताद्यज्ञः प्रयुज्यताम् (तैब्रा ३.७.४.१) इति जपित्वा[३७] ममाग्ने वर्चो विहवेष्वस्तु[३८] (तैसं ४.७.१४.१) इत्याहवनीयमुपसमिन्द्धे । उत्तरया[३९] गार्हपत्यमुत्तरया[४०] ऽन्वाहार्यपचनम् ।।४।।**

अन्वाधानाधिकारात्तस्याङ्गं जपः । तेन प्रायणीयादौ निवर्तते । उपसमिन्द्धे काष्ठैर्दीपयति । तत्र त्रीणि त्रीणि काष्ठान्यादधीतेति बौधायनः[४१] । समिध आदधातीति कात्यायनः[४२] ।

३७. चि – जपति ।४। धूर्तस्वामिनाऽपि 'जपति' एव व्याख्यातं, परंतु बहुतरकोशेषु 'जपित्वा' इत्येव पाठः ।

३८. वयं त्वेन्धानास्तनुवं पुषेम । मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाऽध्यक्षेण पृतना जयेम ।। इति मन्त्रशेषः ।

३९. मम देवा विहवे सन्तु सर्व इन्द्रावन्तो मरुतो विष्णुरग्निः । ममान्तरिक्षमुरु गोपमस्तु मह्यं वातः पवतां कामे अस्मिन् ।।

४०. मयि देवा द्रविणमा यजन्तां मय्याशीरस्तु मयि देवहूतिः । दैव्या होतारा वनिषन्त पूर्वेऽरिष्टाः स्याम तनुवा सुवीराः ।।

४१. त्रीणि काष्ठानि गार्हपत्येऽभ्यादधाति त्रीण्यन्वाहार्यपचने त्रीण्याहवनीये (बौ १. १.) ।

४२. इत्याहवनीये समिधमादधाति (का २.१.३.), तूष्णीं द्वितीयाम् (४), एवमितरयोरग्न्योः (५) ।

**तिसृभिस्तिसृभिर्वा ।।५।।**

विहव्यानुवाकस्य[४३] दशर्चस्य तिसृभिस्तिसृभिर्ऋग्भिस्त्रीनेतानग्नीन्सकृत्सकृदुपसमिन्द्धे ।

४३. तैसं (४. ७. १४.)

**उत्तमां तु जपेदाहवनीये वाऽऽदध्यात् ।।६।।**

तदा तूत्तमां दशमीं जपेत् । तया पुनराहवनीये काष्ठानि वा आदध्यात् ।

[४४]**व्याहृतिभिरन्वाधानमेके समामनन्ति ।।७।।**

एकैकया व्याहृत्या तानेवाग्नीन् गार्हपत्याद्याहवनीयान्तानेकैकमुपसमिन्द्धे कुत एतत्? वाजसनेयिनां तथाम्नानात्, महाव्याहृतिभिर्वा प्राक्संस्थम् (व २.१.६) इति कात्यायनवचनात्, आधाने च तस्य तस्याग्नेस्तत्तद्व्याहृतिसंबन्

प्रसिद्धेः, स्वयमातृण्णासु समस्तोपदिष्टानामपि विभागप्रदर्शनाच्च । सभ्यावसथ्या-वप्यत्र तूष्णीमुपसमिन्धनीयौ; तत्तु याजमाने दर्शयिष्यामः ।

४४. व्याहृतीभिरिति पाठभेदः

**संनयतः पलाशशाखां शमीशाखां वाऽऽहरति बहुपर्णां बहुशाखामप्रतिशुष्काग्रामसुषिराम् ।।८।।**

सांनाय्ये[४५] नाम दार्शिके दधिपयसी[४६], ताभ्यां प्रवृत्तेज्यः संनयन्नित्युच्यते ।

४५. ब$_{२}$ ब$_{३}$ वै भ$_{२}$ – सांनाय्यं ४६. अ ब$_{२}$ ब$_{३}$ वै भ$_{१}$ भ$_{२}$ दधिश्रृत

**यं कामयेतापशुः स्यादित्यपर्णां तस्मै शुष्काग्रामाहरे-दपशुरेव भवति । यं कामयेत पशुमान्त्स्यादिति बहुपर्णां तस्मै बहुशाखामाहरेत् पशुमन्तमेवैनं करोति (तैब्रा ३.२.१.२) इति विज्ञायते ।।९।।**

यं कामयेतापशुः स्यादित्यगुणाया वर्जनार्थं न त्वध्वर्युकामवशात्तस्या एव ग्रहणार्थम् । कुतः? यजमानपरिक्रीतस्यर्त्विजस्तदहिते प्रवर्तनायोगात्, यं काम-येतापशुः स्यादिति पराचीं तस्य[४७] इत्युक्तम् (२४.१४.१६), पदाभ्यास-प्रतिषेधस्तु (२४.१४.१७) इति सूत्रकारवचनाच्च । यत्र प्रतिपादनीयेऽर्थे ब्राह्मणं प्रदर्शयति तत्र 'विज्ञायते' इत्याहेत्यनुसंधातव्यम् ।

४७. तैसं (१. ७. १. ३.)

**सा या प्राच्युदीची प्रागुदीची वा भवति इषे त्वोर्जे त्वा (तैसं १.१.१.१) इति तामाच्छिनत्ति ।।१०।।**

सा एवंगुणा आहार्या शाखा या वृक्षस्य प्रागादिषु दिक्षु प्रवृत्ता भवति (मािच्छिनत्तीत्यर्थः । भवत्यन्तेन वाक्यं भेत्तव्यं या प्राची सा भवतीति वान्वयः।

**अपि वा 'इषे त्वा' इत्याच्छिनत्ति 'ऊर्जे त्वा' इति संनमयत्यनुमार्ष्टि वा ।।११।।**

संनमयति ऋृजूकरोति वक्रत्वे, इतरथा अनुलोमं मार्ष्टि ।

इति प्रथमा कण्डिका ।

**इमां प्राचीमुदीचीमिषमूर्जमभिसंस्कृताम् । बहुपर्णामशुष्काग्रां हरामि पशुपामहम् (तैब्रा. ३.७.४.८) इत्याहरति ।।१।।**

प्रागुदीचीलिङ्गत्वेऽपि मन्त्रस्य प्राच्युदीच्योरपि शाखयोरनिवृत्तिः, शाखाजात्यभिप्रायेण तत्तदभिधानोपपत्तेः ।

**वायवः स्थोपायव स्थ (तैसं १.१.१.) इति तया षडवरार्ध्यान् वत्सानपाकरोति ।।२।।**

अर्धशब्दोऽत्र स्थानवाची यथा आऽस्यार्धं वव्राज (तैब्रा. २.३.१०.३), त्रिर्दक्षिणार्ध्यम् (तैसं २.५.११.५) इत्यादौ । येषामवरे स्थाने षट्संख्या भवति ते षडवरार्ध्याः । तानपाकरोति मातृभ्यः पृथक्करोति । मातृसंगतानां वत्सानां युगपद्दुरपाकरणीयत्वात् प्रतिवत्सं मन्त्रावृत्तिः । बहुवचनं तु मन्त्रगतमुपरवमन्त्रवत्सर्वापेक्षं द्रष्टव्यम् ।

**दर्भैर्दर्भपुञ्जीलैर्वा ।।३।।**

पुञ्जीलं स्तम्बः ।

**देवो वः सविता प्रार्पयतु (तैसं १.१.१)[1] इति शाखया गोचराय गाः प्रस्थापयति ।।४।।**

गावो यत्र चरन्ति तस्मै देशाय यथासमाम्नातेनाघशंसान्तेन मन्त्रेण गाः सर्वा निष्कासयति । वत्सविनाकृतानां गवां युगपच्छक्यनिष्कासनत्वात् नावृत्तिर्मन्त्रस्य । यत्र तु न शक्यते तत्रावृत्तिः ।

१. श्रेष्ठतमाय कर्मण आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्मा मा वः स्तेन ईशत माघशंसः। इति मन्त्रशेषः।

**प्रस्थितानामेकां शाखयोपस्पृशति दर्भैर्दर्भपुञ्जीलैर्वा ।।५।।**

गतः । अथ देवो व इत्यादेः प्रस्थापनमन्त्रस्यैव शाखान्तरीयौ कौचित् पाठविकारौ दर्शयति ।

**आप्यायध्वमघ्निया इन्द्राय देवभागमित्येके समामनन्ति, महेन्द्रायेत्येके ।।६।।**

आप्यायध्वमघ्निया देवभागमिति यथासमाम्नातेन पाठेन द्विप्रकारोऽयं पाठो विकल्पते । अथानयोः पाठयोः सर्वत्र तुल्यवद्विकल्पे प्राप्ते व्यवस्थासिद्ध्यर्थं सामान्येनेन्द्रमहेन्द्रशब्दयोर्देवतापरयोः प्रयोगव्यवस्थामाह ।

**इन्द्रं निगमेषूपलक्षयेदिन्द्रयाजिनो महेन्द्रं महेन्द्रयाजिनः ।।७।।**

निगम्यन्ते येषु हविषः प्रतियोगित्वेन रूपेण देवतास्ते मन्त्रा निगमाः । तेषु

सांनाय्यदेवतानिगमे इन्द्रयाजिनो यजमानस्येन्द्रं निर्दिशेत् महेन्द्रयाजिनो महेन्द्रमित्यर्थः । एतेन चानन्तरोक्तौ प्रयोगविकल्पावन्ये च कामधुक्षः (१.१३.३)[२] इत्यादयो निगमा व्याख्याता भवन्ति । एतदेवाभिप्रेत्य निगमेष्विति बहुवचनं कृतमिति वेदितव्यम् ।

२. तैब्रा (३. ७. ४. १६.)

**शुद्धा अपः सुप्रपाणे पिबन्तीः शतमिन्द्राय शरदो दुहानाः ।**
**रुद्रस्य हेतिः परि वो वृणक्तु[३] इति प्रस्थिता अनुमन्त्रयते ।।८।।**

अनुपूर्वोऽभिपूर्वश्च मन्त्रयतिस्तदभिसंधाय मन्त्रोच्चारणे प्रयुज्यते । अभिपूर्वस्तु तस्मिन्नेवाभिमुख्याधिक इत्यपरम् । अत्र केचित् शतमिन्द्रायेति निगमे महेन्द्रयाजिनो महेन्द्रोपलक्षणं निषेधन्ति । तत्तु न मृष्यामहे पूर्वसूत्रविरोधात् । न चास्यानिगमत्वं शङ्कनीयम्, इन्द्राय दुहाना इति दोहदेवतासंबन्धस्य प्रयोगसमवायिनोऽभिधानात् । तथा च शतमिन्द्रायेति प्रकृत्याह भारद्वाजः महेन्द्राय इति वा यदि महेन्द्रयाजी भवति (भा. १.२.१९) इति ।

३. मन्त्रोऽयं भारद्वाज-सत्याषाढ-मानव-वाराहसूत्रेष्वपि इत्थमेव पठ्यते । वैखानससूत्रे च 'शुद्धा अपः' इति प्रतीकमात्रं दृश्यते । तत्र प्रथमः पादः ऋ (६. २८. ७); अथ (४. २१. ७.), (७. ७५. १.); मैसं(४. १. १.); तैब्रा(२. ८. ८. १२.) एषु ग्रन्थेषु लभ्यते । तृतीयपादश्च तैसं (१. १. १.); मैसं (४. १. १.) तैब्रा (३. २. १. ५.) एषु । द्वितीयपादस्य मूलं त्वद्यापि मृग्यमेव । उपलब्धसंहिता-ब्राह्मणेषु न दृश्यते ।

**ध्रुवा अस्मिन् गोपतौ स्यात बह्वीः (तैसं १.१.१) इति यजमानस्य गृहानभिपर्यावर्तते ।।९।।**

अभिपर्यावर्तते अभिमुखः प्रतिनिवर्तते ।

**यजमानस्य पशून् पाहि (तैसं १.१.१) इत्यग्निष्ठेऽनस्यग्न्यगारे वा पुरस्तात्प्रतीचीं शाखामुपगूहति पश्चात्प्राचीं वा ।।१०।।**

अग्निसमीपस्थमनोऽग्निष्ठं, यद्वक्ष्यति– शकटमवस्थितं भवति (१.७.६) इति । तस्मिन् अग्न्यगारे वा पुरस्तात्प्रतिपद्य [४]प्रत्यग्गतामुपगूहति पश्चाद्वा प्रतिपद्य [५]प्राग्गतामित्यर्थः । पुरस्ताद्भागेऽनसः प्रत्यगग्रां पश्चाद्भागेऽनसो वा प्रागग्रामित्यन्ये । शाखानिधानं भाव्युपयोगार्थं न वत्सापाकरणशेषः, तेन पशावपि भवत्येव ।

४. वा ब१ -प्रत्यगायता°; ब२ ब३ - प्रत्यगग्रां ता°
५. वा सा इ फ ब१ सं – प्रागायता° ; ब२ ब३ प्रागग्रभूता°

अथेदानीमुत्तरोत्तरेषु अनुष्ठेयेषु ऋत्विजामप्रमादार्थं कर्मानुसंधानप्रशंसां ब्राह्मणोक्तामुदाहरति–

**यो वा अध्वर्योर्गृहान् वेद गृहवान् भवति । आ चतुर्थात् कर्मणोऽभिसमीक्षेतेदं करिष्यामीदं करिष्यामीति । एते वा अध्वर्योर्गृहाः । य एवं वेद गृहवान् भवति[६] इति विज्ञायते ।।११।।**

योऽध्वर्युरध्वर्योर्गृहान् वेद स गृहवान् भवति । के ते अध्वर्योर्गृहाः? अग्नीनाधास्यामि, शाखामाहरिष्यामि, इत्येवम् आ चतुर्थात्कर्मणः अभिसमीक्ष्य येऽनुसन्धीयन्ते पदार्थास्तेऽध्वर्युगृहाः । य एवं वेद, य एतेऽध्वर्युगृहा इति वेद सोऽपि गृहवान् भवतीत्यर्थः । तत्र तु वेदनस्य परार्थत्वात् फलवचनं प्ररोचनार्थं, यथा यो वा अध्वर्योः प्रतिष्ठां वेद (तैसं ३.१.२), यो वा अध्वर्योः स्वं वेद (तैसं३.१.२), यो वा अध्वर्योरायतनं वेद[७] इत्यादौ । ततश्चैवं न शङ्कितव्यं यजमानस्यैवेदमेवंविदुषः फलमिति । चतुर्थग्रहणं यावच्छक्यस्योपलक्षणम्, अनुसंधानाधिक्ये गुणाधिक्यात् । तथाध्वर्युग्रहणमपि सर्वर्त्विजामुपलक्षणमुपयोगसाम्यात् ।

६. अनुपलब्धमूलमिदम् ।
७. मयोपयुक्तेषु त्रयोदशसु कोशेषु द्वयोश्च मुद्रितपुस्तकयोरयमेव पाठ उपलभ्यते । उपलब्धवैदिकवाङ्मये तु इदं वाक्यं नोपलब्धम् । तैसं (६. ६. १०. २.) इत्यत्र "यो वा अंशोरायतनं वेद" इति वाक्यं दृश्यते । अतः "यो वा अध्वर्योरायतनं वेद" इति वाक्यं लेखकप्रमादादागतं, लुप्तायां वा कस्यांचित् शाखायां स्यात् ।

इति द्वितीया कण्डिका । इति प्रथमः पटलः ।

**उत्तरेण गार्हपत्यमसिदोऽश्वपर्शुरनडुत्पर्शुर्वा निहिता ।।१।।**

असिदो दात्रम् । पर्शुः पार्श्वास्थि ।

**देवस्य त्वा सवितुः प्रसवे[१]**
**इत्यसिदमश्वपर्शुं वाऽऽदत्ते[२] ।।२।।**
**तूष्णीमनडुत्पर्शुम् ।।३।।**

गतौ ।

१. अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इति मन्त्रशेषः ।
२. तैब्रा (३. २. २. १.)

**यज्ञस्य घोषदसि (तैसं १.१.२) इति गार्हपत्यमभिमन्त्र्य प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः (तैसं १.१.२) इत्याहवनीये गार्हपत्ये वाऽसिदं प्रतितपति ।।४।।**

यदाप्याहवनीये प्रतितपति तदाप्यभिमन्त्रणं गार्हपत्यस्यैव, प्रतितपन एव विकल्पवचनात् ।

**न पर्शुम्[३] ।।५।।**

प्रतितपतीति शेषः । अत एव प्रतिषेधाज्जानीमो यदेकत्रानेकसाधनविकल्पेषु मुख्ये कृतो विधिः सवर्थो भवतीति ।

३. पर्शू – इति बहुषु कोशेषु

**प्रेयमगाद् (तैसं १.१.२)[४] इत्युक्त्वा उर्वन्तरिक्षमन्विहि (तैसं१.१.२) इति प्राचीमुदीचीं वा दिशमभिप्रव्रज्य यतः कुतश्चिद्दर्भमयं बर्हिराहरति ।।६।।**

प्रथमं विहारात् प्राचीमुदीचीं वा दिशमभिप्रव्रज्य ततो यतः कुतश्चिद् दिशो दर्भमयं बर्हिराहरति यतो लभ्यते । बौधायनस्त्वाह – आहवनीयादेवाग्रे त्रीन्वा चतुरो वा प्राचः प्रक्रमान्प्रक्रम्याथ तां दिशमभिप्रव्रजेद्यत्र बर्हिर्वेत्स्यन्मन्येत (बौ २०.२) इति । प्रेयमगादित्यपि गमनमन्त्र एव तल्लिङ्गत्वात्, यौ गमनौ (१.५.१) इत्युत्तरत्रानुवादाच्च । किमर्था तर्हि 'उक्त्वा' इति अधिकोक्तिः? उच्यते । मन्त्रसमाम्नाये हि द्वितीयो मन्त्रः प्रत्यागमनक्रमे पठितो न गमनक्रमे । कल्पान्तरकारैश्च तौ उभयत्र व्यवस्थया विकल्पेन च विनियुक्तौ । आचार्यस्तु उभयोरुभयत्र समुच्चयं मन्यते । तेन यत्नं कृतवानेतत्प्रथममुक्त्वा ततोऽनेन[५] प्रव्रजतीति । अथवा यतः कुतश्च बर्हिराहरणेऽपि पुरस्ताद्बर्हिरासद इति मन्त्रार्थवशेन पुरस्तादाहरणगुणसिद्धिर्ब्राह्मणे दर्शिता– अथो यदेतदुक्त्वा यतः कुतश्चाहरति तत्प्राच्या एव दिशो भवति (तैब्रा ३.२.२.३) इति । तस्यैवार्थमनुकरोत्याचार्यः प्रेयमगादित्युक्त्वा यतः कुतश्चाहरतीति । स चायं मन्त्रः स्त्रीलिङ्गादसिदे नीयमाने निवर्तते इति केचित् । तदयुक्तं, तूष्णीमनडुत्पर्शुम् (सू. ३) न पर्शुम्[६] (सू. ५) इति पर्श्वसिदयोरभिप्रेतविशेषवचनादवचनाच्चात्र विशेषस्य । न च स्त्रीलिङ्गविरोधः धिषणाभिधानात्, यथोक्तं ब्राह्मणे विद्या वै धिषणा विद्ययैवैनदच्छैति (तैब्रा ३.२.२.२) इति । यदपि पर्शुविधानबला-

द्विषणाशब्दो गुणवृत्त्या पर्श्वभिधायीष्यते, तथैवेष्यतामसिदेऽपि । न च तत्रासिदे वैलिङ्ग्यं दोषाय, धिषणात्वेन तस्योपचारात् । असिदाकृतिविवक्षया, व्यत्ययेन वा स्त्रीलिङ्गोपपत्तेः । यदप्यस्या विशेषणं मनुना कृतेत्यादि, तदप्यविशिष्ट-मेवोभयोः । तस्मादनिवृत्तिरुभयत्रापि मन्त्रस्य ।

४. धिषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा त आवहन्ति कवयः पुरस्ताद् देवेभ्यो जुष्टमिह बर्हिरासदे इति मन्त्रशेषः ।

५. त्रयोदशसु कोशेषु द्वयोश्च मुद्रितपुस्तकयोरयमेव पाठः। ''ततोऽन्येन'' इति पाठः समीचीनः स्यात् । द्र. - तालवृन्तवासिप्रयोगः – प्रेयमगा.....सद इत्युक्त्वा (असिदं कमंडलुं चादाय) उर्वन्तरिक्षमन्विहीति गच्छति ।

६. पर्शू इति पाठभेदः ।

**देवानां परिषूतमसि[७] (तैसं १.१.२) इति दर्भान् परिषौति ।।७।।**

परिषौति यावता पर्याप्तं तावत्परिगृह्णाति ।

७. वर्षवृद्धमसि – इति मन्त्रशेषः

**विष्णोः स्तूपोऽसि (तैसं १.१.११) इत्यभिप्रेतानामेकं स्तम्बमुत्सृजति ।।८।।**

तेषां लाव्यत्वेनाभिप्रेतानां मध्ये स्तम्बं त्वेकमुत्सृजति यथा न लूयते तथा बहिष्करोतीत्यर्थः ।

**एकं वा स्तम्बं परिषूय तं सर्वं दाति ।।९।।**

एकमूलप्रभवो दर्भसमूहः स्तम्बः । तावत्सर्वं छिनत्ति न तु किंचिदुत्सृजति अन्ये त्वपरिषूता एव लूयन्त इत्यर्थः ।

**अतिसृष्टो गवां भागः (मैसं १.१.४) इति वैकां द्वे तिस्रो वा नाडीरुत्सृजति ।।१०।।**

नाडी शलाका ।

**इदं देवानाम् (तैसं १.१.४) इति परिषूतानभिमृशति । इदं पशूनाम्[८] इत्यतिसृष्टान् ।।११।।**

अनुत्सर्गपक्षेऽपि भवत्येव परिषूतस्तम्बाभिमर्शनं बर्हिःसंस्कारत्वात् ।

८. सौत्रोऽयं मन्त्रः । सत्याषाढसूत्रेऽप्यस्ति (१.२, पृ. ८२), वैखानससूत्रेऽपि (३.४, पृ. ३४)

**देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां बर्हिर्देवसदनमारभे[९] इति विशाखेषु दर्भानारभते ।१२।**

विशाखाः प्रकाण्डादूर्ध्वभागाः यतः शलाकाः पृथग्भवन्ति, तेष्वारभते आलभते स्पृशतीति यावत् ।

९. भारद्वाजसत्याषाढसूत्रयोरपि मन्त्रोऽयम् । मूलं त्वस्य (मैसं १.१.२.) । एतावांस्तु विशेषः – तत्र 'आरभे' इत्यस्य स्थाने 'दामि'

**देवबर्हिर्मा त्वाऽन्वङ्मा तिर्यक् (तैसं १.१.२) इति[१०] संयच्छति ।।१३।।**

संयच्छति लवनानुगुणं सव्यमुष्टिना गृह्णाति ।

१०. चि - इति सव्यहस्तेन संयच्छति

**पर्व ते राध्यासम् (तैसं १.१.२) इत्यसिदमधिनिदधाति ।।१४।।**

पर्वणि निदधाति । यत्परुषि दिनं तद्देवानाम् (तैब्रा १.६.८.६) इति श्रुतेः । पर्व ते राध्यासम् - इति मन्त्रवर्णाच्च ।

**आच्छेत्ता ते मा रिषम् (तैसं १.१.२)इत्याच्छिनत्ति ।।१५।।**

गतः ।

**संनखं मुष्टिं लुनोति[११] ।।१६।।**

संनखं संगताङ्गुल्यङ्गुष्ठनखं तावत्प्रमाणमित्यर्थः । लुनोति लुनाति विकरणव्यत्ययः ।

११. चि –लुनाति

**स प्रस्तरः ।।१७।।**

सोऽयं प्रथमलूनो मुष्टिः प्रस्तरः समाख्यायते ।

**कुल्मिमात्रोऽरत्निः प्रादेश ऊर्वस्थि जान्वस्थि स्रुग्दण्ड इति वा तिर्यक्प्रमाणानि ।।१८।।**

